वेदान्त के चार वाक्य—अहं ब्रह्मास्मि, तत्त्वमसि, प्रज्ञानं ब्रह्म अयमात्मा ब्रह्म।

ज्ञान की सप्तभूमिकाएं—शुभेच्छा, विचारणा, तनुमानसा, सत्त्वापत्ति, असंसक्ति, पदार्थाभाविनी, तुर्यगा।

साधन चतुष्टय—नित्यानित्य वस्तु विवेक, वैराग्य, षट्सम्पत्ति (शमद्रम, तितिक्षा, उपरति, श्रद्धा और समाधान) मुमुक्षुत्व।

त्रिविध नरक द्वार—काम, क्रोध, लोभ।

त्रिविध ज्ञान के द्वार - श्रद्धा, तत्परता, इन्द्रिय संयम।

भक्ति के चार महावाक्य – कृष्णस्तु भगवान् स्वयं, मत्वः परतरं नान्यत् ब्रह्मणो हि प्रतिष्ठाहम्, मामेकं शरणं व्रज।

द्विविधा भक्ति—अपरा-गौणी अथवा परा और रागानुगा।

नवधा भक्ति—श्रवण, कीर्तन, स्मरण, पादसेवन, अर्चन-वन्दन दास्य, सख्य, आत्म निवेदन।

पञ्चभाव—शान्त, दास्य, सख्य, वात्सल्य और मधुर।

अष्टसात्त्विक भाव—स्तम्भ, स्वेद, रोमाञ्च, स्वरभंग, कम्प, वैवर्ण्य, अश्रु और प्रलय।

प्रेम की तीन अवस्थाएँ—पूर्वराग, मिलन और वियोग।

त्रिविध विरह—भूत, वर्तमान, भावी।

विरह की दश दिशाएँ—चिन्ता, जागरण, उद्वेग, कृशता, मलिनता, प्रलाप, उन्माद, व्याधि, मोह और मृत्यु।

चतुर्विध भाव—भावोदय, भावसन्धि, भावशावल्य, भावशान्ति।

द्विविध महाभाव—रूढ़ और अधिरूढ़।

द्विविध अधिरुढ़ महाभाव—मोदन और मादन (मोहन)।

षट् कर्म—धौति, कपालभाति, गजकरणी, वस्ति, नौलि, नेति; कोई-कोई त्राटक समेत ७ मानते हैं।

प्राणायाम—पूरक, कुम्भक एवं रेचक।

चतुर्विध पातञ्जलोक्त प्राणायाम—आभ्यन्तर और बाह्य और दो प्रकार के केवल प्राणायाम।


अष्टविध प्राणायाम—सूर्य भेदन, उज्जायी, सीत्कारी, शीतली मस्तिका, भ्रामरी, मूर्च्छा और प्लाविनी; कुछ लोग अनुलोम, विलोम को जोड़कर ९ मानते हैं।

दैनिक श्वास—२१६००

तीन नाड़ियां—इडा, पिङ्गला और सुषुम्ना।

दस वायु—प्राण, अपान, व्यान, उदान, समान, नाग, कूर्म, कृकल देवदत्त और धनञ्जय।

योग के षट्चक्र—मूलाधार, स्वाधिष्ठान, मणिपूर, अनाहत, विशुद्ध और आज्ञा। सातवाँ सहस्रार, आठवाँ तालु में चक्र तथा नवाँ ब्रह्मरन्ध्र में गुरुचक्र।



षोडश आधार—(१) दाहिने पैर का अँगूठा (२) गुल्फ (३) गुदा (४) लिङ्ग (५) नाभि (६) हृदय (७) कण्ठकूप (८) तालुमूल (९) जिह्वामूल (१०) दन्तमूल (११) नासिकाग्र (१२) भ्रूमध्य (१३) नेत्रमण्डल (१४) ललाट (१५) मस्तक और (१६) सहस्रार।

तीन ग्रन्थियां—ब्रह्म ग्रन्थि, विष्णु ग्रन्थि, रुद्र ग्रन्थि।

त्रिमार्ग—पिपीलिका मार्ग, दार्दुर मार्ग और विहंगम मार्ग।

त्रिशक्ति—ऊर्ध्व शक्ति (कण्ठ में) मध्य शक्ति (नाभि में) और अधः शक्ति (गुदा में)।

पञ्चभूत—पृथ्वी, जल, तेज, वायु और आकाश।

पञ्चाकाश—आकाश, महाकाश, पराकाश, तत्त्वाकाश और सूर्याकाश।

वर्ण—अ से ह तक्ष (५०)।

चतुर्विध वाणी—परा, पश्यन्ती, मध्यमा और वैखरी।

योग के आठ अङ्ग—यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि।

यम—अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य प्रौर अपरिग्रह।

नियम—शौच, सन्तोष, तप, स्वाध्याय और ईश्वर प्राणिधान।

संयम—धारणा, ध्यान, समाधि।

क्रियायोग—तप, स्वाध्याय और ईश्वर प्राणिधान।

द्विविध ध्यान—भेदभाव से और अभेद भाव से।

द्विविध समाधि—सम्प्रज्ञात या सबीज, असम्प्रज्ञात या निर्बीज।

असम्प्रज्ञात के दो भेद—भव प्रत्यय, उपाय प्रत्यय।

पञ्च वृत्तियाँ—मूढ, क्षिप्त, विक्षिप्त, एकाग्र और निरुद्ध।

पञ्च क्लेश—अविद्या, अस्मिता, राग, द्वेष और अभिनिवेश।

सप्तसाधन—शोधन, दृढ़ता, स्थैर्य, धैर्य, लाघव, प्रत्यक्ष और निर्लिप्तता।

योग के विघ्न—व्याधि, संशय, प्रमाद, आलस्य, विषय, तृष्णा भ्रान्ति, फल में सन्देह, चित्त की अस्थिरता, दुःख, मन का मालिन्य, देह की चञ्चलता, अनियमित श्वास-प्रश्वास, अनियमित और उत्तेजक आहार, अनियमित निद्रा, ब्रह्मचर्य का नाश, अनुकृत (नकली) गुरु का शिष्यत्व, सच्चे गुरु का अपमान, भगवान पर अविश्वास, सिद्धियों की चाह, अल्पसिद्धि में पूर्ण सफलता मानना, विषयानन्द, पूजा करवाना, गुरु बनना और (दम्भ करना)।

आठ महासिद्धियाँ—अणिमा, गरिमा, लघिमा, प्राप्ति, प्राकाम्य, ईशित्व, वशित्व और यत्रकामावसायित्त्व। कुछ लोग गरिमा सहित ९ मानते हैं।

चतुर्विध साधन—मृदु, मध्य, अधिमात्र और अधिमात्रतम।

चार अवस्थाएं—जागृत, स्वप्न, सुषुप्ति एवं तुरीय।

सप्त का महत्त्व—पृथ्वी की सात धातुएँ, सप्तपदी, सप्तस्वर, अग्निकलाएँ, सात चमड़ी के सातपर्त, सप्ताह।

ज्ञान की सप्त भूमिकाएं—शुभेच्छा, विचारणा, तनुमानसा, सत्त्वापत्ति, असंसक्ति, पदार्थभावनी और तुर्यगा।

चौथा अध्याय

शाक्त प्रमोदानुसार श्री श्रीयन्त्र पूजानुक्रम

अथ मन्त्रोद्धारः

आदौ लज्जां समुच्चार्य्यं कएईल तत ऽ परम् ।। पुनश्च लज्जामुच्चार्य्यं हसकहल तु तत्परम् ।।१।। ततो लज्जाम्पुन ऽ प्रोच्य लज्जान्तं सकलन्तत ।। षोडशाक्षरमन्त्रोऽयं षोडश्यास्समुदाहृतः ।। इयन्तु सुन्दरी विद्या देवानामपि दुर्ल्लभा ।। गोपनीया प्रयत्नेन सर्व्वसम्पत्करी मता ।।३।।

अथ मन्त्रः

ह्रींकएईलह्रीं हसकहलह्रीं सकलह्रीं ।।

अथ पूजाविधिः

ब्राह्मे मुहूर्ते उत्थाय शय्यायामेव स्थित्वा शिरसि महासहस्रदलकमले श्रीगुरुन्ध्यायेत्-द्विनेत्रन्द्विभुजं शान्तङ्गुरुम्पद्मासनस्थितम् ।। यथावर्णं सुखासीनम्मुक्तम्भास्वररूपिणम् ।। वराभयकरम्ब्रह्मविष्णुशङ्कररूपिणम् ।। वामेनोत्पलधारिण्या शक्त्या वामाङ्गसँय्युतमिति ध्यात्वा । अखण्डमण्डलाकारँ व्याप्तँ य्येन चराचरम् ।। तत्पदन्दर्शितँ य्येन तस्मै श्रीगुरवे नमः ।। अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।। चक्षुरुन्मीलितँ य्येन तस्मै श्रीगुरवे नमः ।। नमोस्तु गुरवे तस्मै इष्टदेव-

० 'शाक्त प्रमोद' में वर्णित विधि के अनुसार श्री यन्त्र (श्रीविद्या) की पूजा विधि में सर्व प्रथम मन्त्रोद्धार बताते हैं कि लज्जा (ह्रीं) का उच्चारण करके "क ए ई ल" कहे तदनन्तर पुनः लज्जा (ह्रीं) कहे तदनन्तर "ह स क ह ल" कहे, पुनः लज्जा (ह्रीं) का उच्चारण करे तत्पश्चात्—'स क ल ह्रीं' कहे। इस प्रकार श्री यन्त्र, षोडशी विद्या, श्रीविद्या एवं श्री ललिता देवी का मन्त्र इस प्रकार हुआ—"ह्रीं क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं। अब श्री यन्त्र का पूजा विधान कहते हैं—ब्राह्म मुहूर्त में उठकर शय्या में ही बैठे हुए अपने शिर में स्थित सहस्रदल कमल में श्री गुरुदेव का ध्यान करे। द्विनेत्रं

स्वरूपिणे ।। यस्य वागमृतं हन्ति विषसंसारसङ्कुलम् ।। अनन्तरात्मागुरुन्नमस्कृत्य अन्तर्भावनाङ्कुर्य्यात् । मूलमष्टोत्तरशतञ्जपेत् ।। समुद्रमेखले देवि पर्व्वतस्तन-मण्डले ।। विष्णुपत्नि नमस्तुभ्यम्पादस्पर्शङ्क्षमस्व मे इतिपठन् वामपादपुरस्स-रम्भूमिं स्पृशेत् ।। तत्र मन्त्रः । लसहह्लीं ऐँकइल्कींस इतिस्मृत्वा । तत्र चासन-मास्तीर्य्योपविश्य मूलादिब्रह्मरन्ध्रान्तम्मूलविद्यां विचिन्तयेत् । उद्यतादित्य सङ्काशान्तडित्कोटिसमप्रभाम् ।। तत्प्रभापटलव्याप्तन्देहं सुपरिचिन्तयेत् ।। षट्चक्र-भेदनङ्कुर्य्यात् ।। तद्यथा । गुदलिङ्गान्तरे 'वंशंषंसं' इतिचतुर्दलम्पीतवर्णम्मूलाधा-रम् अत्रदेवता डाकिनी गणेशश्चतुर्द्दन्तस्त्रिकोणविद्युद्वर्णन्तन्मध्ये विसतन्तुतनीसी शेषाव्वर्तनिमां सार्द्धत्रिवलान्वितम्प्रसुप्तभुजगाकारां सोमसूर्य्याग्निरूपिणीङ्कुण्ड-लिनीं शक्तिं हूंकारेण मनोमयदण्डेनाहत्योत्थाप्य हंसइति जप्त्वा ।।१।। लिङ्गमूले बंभंमंयंरंलमिति रक्तं स्वाधिष्ठानम् तत्र डाकिनी देवी ब्रह्माच ।।२।। नाभौडं-ढंणंतंथंदंधंनंपंफमिति नीलं मणिपूरम् तत्र लाकिनी देवी विष्णुश्च ।।३।। हृदये कंखंगंघंङं चंछंजंझंञं टंठमिति द्वादश दलन्धूम्रमनाहतचक्रम् तत्र काकिनी देवी रुद्रश्च ।।४।। कण्ठे अंआंइंईंउंऊंऋंॠंऌंॡं एंऐंओंऔंअंअः इतिषोडशदलं पिङ्गलवर्णं विशुद्धचक्रम्, तत्र हाकिनी देवी शिवात्मा ।।५।। भ्रूमध्ये हँलमिति द्विदलमाज्ञाचक्रम् तत्र हाकिनी देवी परात्मा च ।।६।। एवं षट्चक्रम्भित्त्वा सहस्रदलकमलकर्णिण-कान्तर्गतबिन्दुरूपे परमशिवे संय्योज्य लक्षाभयरमामृतेन कुण्डलिनीं सन्तर्प्य ।।

से लेकर विष संसार संकुलम्" तक गुरुदेव को अन्तःकरण से स्मरण करे। तत्पश्चात् १०८ बार मूलमन्त्र का जप करे। फिर समुद्र मेखले० मन्त्र को पढ़कर पृथ्वी में अपना बाँया पैर रखे, उस समय "ल स ह ह्लीं ऐँ क इ क्लीं स" इस मन्त्र का स्मरण करे। फिर आसन में बैठकर ब्रह्मरन्ध्र में ध्यान लगाकर मूल विद्या का चिन्तन मूल मन्त्र पढ़ते हुए करे तथा "उद्यतादित्य० मन्त्र पढ़कर श्री विद्या का ध्यान करे। तत्पश्चात् छहों चक्रों का भेदन करे। गुदा और लिंग के मध्य में "वं शं षं सं" इन चार दल वाले पीले वर्ण के मूलाधार देवता डाकिनी गणेश चार दाँतों वाले विद्युत के समान प्रकाशमान त्रिकोण के मध्य में त्रिवलि युक्त सोते हुए सर्प के आकार की सोम सूर्य अग्नि रूपिणी कुण्डलिनी शक्ति को मनोमय दण्ड द्वारा 'हूँ' कहकर जगावे और हं सः" इस मन्त्र का जप करे ।।१।। लिंग के मूल में "बं भं मं यं रं लं" कह-कर रक्तिम स्वरूप देखे और डाकिनी देवी एवं ब्रह्माजी का स्मरण करे ।।२।। नाभि में "डं ढं णं तं थं दं धं नं पं फं" इस मन्त्र को पढ़े तथा नीलमणि के समान वर्ण वाली लाकिनी देवी एवं विष्णु भगवान का ध्यान करे ।।३।। तदनन्तर हृदय में 'कं खं गं घं ङं चं छं जं झं ञं टं ठं" मन्त्र पढ़कर द्वादश-दल वाले धूम्रवर्ण के अनाहत चक्र में काकिनी देवी एवं रुद्र का ध्यान

पुनराज्ञाविशुद्धानाहतन्त्रिपुरस्वाधिष्ठानम्मूलाधारन्नयेत् ।। इतिभावना देवीन्ध्यात्वा मानसोपचारैस्सम्पूज्य जप्त्वा स्तुत्वा नत्वा आवश्यकशौचादिकङ्कृत्वा दन्तधावनङ् गृहीत्वा क्लींसर्व्वजनप्रियायै रतिकामस्वरूपायै नम इतिमन्त्रेण दन्तधावनङ्कुर्य्यात् । ततो मूलेन मुखप्रक्षालनङ्कृत्वा यथाकाले जलाशयङ्गत्वा सूर्य्याभिमुखम्मुसलवदेकवारन्निमज्ज्य पुरतश्चतुर्हस्तप्रमाणञ्चतुरस्रम्प्रकल्प्य तन्मध्ये त्रिकोणँ व्विलिख्य सूर्य्यमण्डलादङ्कशमुद्रया तीर्थमानयेत् । ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ।। नर्म्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिङ्कुरु ।। वमिति धेनुमुद्राम्प्रदर्श्य मूलमष्टधा जपित्वा ।। कलशमुद्रया मूलेन सप्तधा शिरस्सिञ्चयेत् । सप्तच्छिद्राणि निरुध्य त्रिधा निमज्जयेत् । पापप्रोक्षणङ्कृत्वा सन्ध्याङ्कुर्य्यात् ।। प्राणायामत्रयङ्कृत्वा वमिति धेनुमुद्रया जलममृतीकृत्य त्रिभिः शिरो मूलेनाभ्युक्ष्य नवधाऽऽचम्य तञ्जलन्दक्षिणकरे कृत्वा लंवंरंयंहमिति पाञ्चभौतिकमन्त्रमष्टधा जपित्वा मूलन्दशधा जपेत् । वामहस्तानामिकाङ्गुष्ठाभ्याञ्छोटिकायोगेन त्रिः शिरोभ्युक्ष्यावशिष्टजलं व्वामहस्तेईडया अन्तर्गतम्मत्वा तेनैव निश्शेषकलुषन्दग्धं व्विचिन्त्य पिङ्गलायाम्बहिर्गतँ व्विभाव्य तञ्जलन्दक्षिणकरे कृत्वा तत्र पापपुरुषँ विचिन्त्य वामभागे भूमौ वज्रशिलान्ध्यात्वा तत्र निक्षिप्य पापपुरुषञ्चर्णितम्भावयेदित्यधमर्षणम् । ततो देवादीन् यथाविधि सन्तर्प्य । ॐ गणेशन्तर्प्पयामि, सर्व्वान्पितृगणांस्तर्प्पयामि, सर्व्वान्मातृगणांस्तर्प्पयामि, सर्वान्मनुष्यगणां-

---

करे ।।४।। तत्पश्चात् कण्ठ में "अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः" इस मन्त्र का षोडश दल, पिंगल वर्ण विशुद्ध चक्र में शाकिनी देवी शिवात्माका ध्यान करे ।।५।। दोनों भृकुटियों (भौंहों) द्विदल का आज्ञा चक्र है, उसमें हाकिनी देवी व परात्मा का निवास है ।।६।। इस प्रकार छहों चक्रों का भेदन कर सहस्रदलकमलकर्णिका के अन्तर्गत बिन्दु रूप में परम शिव का संयोजन कर लक्षाभयरमामृत से कुण्डलिनी को तृप्त करे, फिर आज्ञा विशुद्ध अनाहतत्रिपुर स्वाधिष्ठान मूलाधार को जाये, इस भावना से देवी का ध्यान करके मानस पूजा द्वारा जप स्तुति एवं प्रणाम पूर्वक आवश्यक शौचादि कर्मों से निवृत्त होकर दातून करे। क्लीं सर्वं जनप्रियायै० मन्त्र पढ़े। फिर मूलमन्त्र से मुख प्रक्षालन कर जलाशय में जाकर सूर्य की ओर मुखकर मूसल की भाँति एक बार जल में डूबकर अपने सामने चार हाथ का चतुर्भुज खींचकर और उसके मध्य में त्रिकोण बनाकर सूर्य मण्डल से अंकुश मुद्रा के द्वारा तीर्थों का आकर्षण करे। ॐ गंगे च यमुने चैव० मन्त्र पढ़े। धेनुमुद्रा प्रदर्शित करते हुए आठ बार 'वं' कहे। कलश मुद्रा से मूल मन्त्र पढ़कर सात बार अपने सिर का संमार्जन करे। सातों छिद्रों का अवरोधकर तीनबार निमज्जन करे। पाप प्रोक्षण कर सन्ध्या करे। तीन बार प्राणायाम कर धेनु-

स्तर्प्पयामि, सर्व्वान्तर्य्यामि मूलमुच्चार्य श्रीमहात्रिपुर सुन्दरीन्तर्प्पयामि नम इति-त्रिवाररन्तर्प्पयित्वा ऐंआत्मतत्त्वंशोधयामि, क्लींविद्यातत्त्वं शोधयामि, सौंशिवतत्त्वं शोधयामि, ऐंक्लींसौंसर्व्वतत्त्वं शोधयामि । ततो जलादुत्थाय धौतवाससी परिधाय मूलेन तिलकङ्कृत्वा गन्धपुष्पाक्षतैरर्घ्यं सम्पाद्य ओं ऐं ह्रीं श्रीं कुलमार्तण्डभैरवाय तिथिवारनक्षत्रयोगकरणप्रकाशशक्तिसहिताय एषोऽर्घ्योनम इतिमन्त्रेण सूर्य्यार्घ्यन्दत्त्वा यथाशक्ति देवतागायत्रीञ्जपेत् । क्लींकामेश्वरीं विद्महे वागीश्वरीन्धीमहि तन्न ऽ क्लिन्ना प्रचोदयात् । रात्रौ चन्द्रार्घ्यन्दत्त्वा । क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भव ।। गृहाणार्घ्यमिदन्देव रोहिण्या सहित प्रभो ।। इति चन्द्रार्घ्यन्दद्यात् । एवं सन्ध्याकालत्रयेऽपि कुर्य्यात् । ततो दिक्पतीन्नमस्कृत्य पूजागृहद्वारमागत्य हस्तौ पादौ प्रक्षाल्याचम्य अस्त्रायफट्नम इतिद्वारं सम्प्रोक्ष्य पूजयेत् । वामेशाखायां: गंगणेशायनमः, दक्षिणे क्षंक्षेत्रपालायनमः, ऊद्ध्वे द्वांद्वारश्रियैनमः, देहलीमध्ये देहल्यैनमः, वामपार्श्वे क्लीं-कामदेवायनमः, रंरत्यैनमः, वांवसन्तायनमः प्रींप्रीत्यैनमः ॐशङ्खनिधयेनमः, दक्षपार्श्वे पद्मनिधयेनमः सरस्वत्यैनमः श्रियैनमः मायायैनमः दुर्ग्गायैनमः भद्रकाल्यैनमः स्वाहायैनमः शुभकर्य्यैनमः गौर्य्यैनमः लोकधात्र्यैनमः वागीश्वर्य्यैनमः, दक्षपादपुरस्सरमङ्गानि सङ्कोचयन् गृहान्त ऽ प्रविशेत् । ततो गृहान्तर्प्पयेत् ।। ऐशान्याम्पूजयेत् ।। ॐ वास्तुपुरुषायनमः ॐ ब्रह्मणेनमः ।। ततः अपसर्प्पन्तु ते भूता ये भूता भुवि संस्थिताः ।। ये भूता विघ्नकर्त्तारस्ते नश्यन्तु

मुद्रा से जल को अमृत समझ कर तीन बार शिर का सम्मार्जन मूल मन्त्र से करे । नव बार आचमन करे । जल लेकर (दाहिने हाथ में) लं वं रं यं हं इस पाँच भौतिक मन्त्र को आठ बार जपने के पश्चात् मूल मन्त्र का १० बार जप करे । बाँयें हाथ की अनामिका और अंगुष्ठ से तीन बार सिरपर जल छिड़के शेष जल को बाँयें हाथ में ईडा के अन्तर्गत मानकर बचे हुए पापों को जला हुआ समझकर पिंगला में वहिर्गत की भावना से जल को दाहिने हाथ में लेकर तथा उसमें पाप पुरुष की परिकल्पना करे और बाँयीं ओर वज्रशिला का ध्यान कर जल छोड़ दे । पाप पुरुष नष्ट हो गया इस प्रकार की भावना करे । यह अघमर्षण विधि हुई । फिर देवों का तर्पण करे 'ॐ गणेशं तर्प्पयामि०' इत्यादि मन्त्रों से तीन बार तर्पण करे । फिर तत्व शोधन 'ॐ आत्मतत्त्वं०' आदि से करे । फिर जल से बाहर आकर धोती आदि वस्त्रों को पहन कर मूल मन्त्र से अपने तिलक करे । गन्ध पुष्पाक्षत से ओं ऐं० इत्यादि मन्त्र से सूर्य को अर्घ्य दे । यथाशक्ति देवता गायत्री मन्त्र का जप करे देवतागायत्री मन्त्र 'क्लीं कामेश्वरी० इत्यादि है । रात्रि में चन्द्रमा को अर्घ्य 'श्री रोदार्णव०' मन्त्र से दे । ऐसा तीनों सन्ध्याओं में करे । फिर दिक्पालों को प्रणामकर पूजा गृह के द्वार में जाये हाथ पैर धोकर, आचमन करे । 'अस्त्रायफट्' कहकर

शिवाज्ञया ।। इति तण्डुलांश्चतुर्दिक्षु विकिरेदिति भूता पसारणम् ।। ऊद्ध्र्वोद्ध्र्वं-तालत्रयंन्दत्त्वा त्रिविध्नान् वामपादत्रिघातादुत्सारयेत् ।। ततो व्याघ्राजिनरक्त कम्वलाद्यासनमास्तीर्य्यासनन्धृत्वा पठेत् ।। अस्यासनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलञ्छन्द ऽ कूर्मो देवता आसनोपवेशने विनियोगः ।। ॐ पृथ्वि त्वया धृता लोका देवि त्वं व्विष्णुना धृता ।। त्वञ्च धारय मान्नित्यम्पवित्रङ्कुरु चासनम् ।। तत ऽ पूजयेत् । कूंकूर्म्मासनायनमः, आधारशक्तिकमलासनायनमः, ऐं ह्रीं श्रीं सर्व्वशक्तिकमलासनायनमः, ॐ पृथिव्यैनमः ।। ततस्स्वस्तिकाद्यासनेनोपविश्य ऐंह्लींश्रीं अमृतार्ण्णवात्मकायनमः इतिपादयोः, ऐंह्लींश्रीं श्वेताम्बुजासनायनम इति जान्वोः, ऐं ह्लीं श्रीं देव्यासनायनम इतिपाश्श्र्वयोः, ऐं ह्लीं श्रीं चक्रासनायनम इतिगुह्ये, आसनस्य चतु ऽ कोणेषु पूजयेत् । ॐ गणपतयेनमः, दुर्ग्गायैनमः, बटुक-भैरवायनमः, क्षेत्रपालायनमः, इति वायव्यादि नैर्ऋत्यन्तम् । तत ऽ ह्लींकएईलह्लीं हसकहलह्लीं सकलह्लीं गंगणपतयेनमः, पृष्ठे क्षेत्रपालायनमः, सम्मुखे श्रीमहात्रि-पुरसुन्दर्य्यैनमः ।। अथ भूतशुद्धिः ।। स्वाङ्के उत्तानौ हस्तौ कृत्वा सोहमिति मन्त्रेण मूलाधारे यथोक्तरूपाङ्कुण्डलिनीं हूँकारेण मनोमयदण्डेनाहत्योत्थाप्य स्वाधीनमणि-पूरानाहतप्रदीपकलिकाकारं जीवात्मानन्तथा सह विशुद्धाख्यचक्रम्भित्वा सहस्र-दलकमलान्तर्ग्गत बिन्दुरूपे परमशिवे सँयोज्य शरीरं शून्यँ व्विचिन्त्य कुक्षौ पापपुरुषन्ध्यायेत् ।। वामकुक्षौ स्थितम्पापपुरुषङ्कज्जलप्रभम् ।। ब्रह्महत्याशिरस्क-

---

द्वारपूजा करे। द्वार पूजन के मन्त्र-'वामेशाखायां गणेशाय नमः' से लेकर 'वागीश्वर्यै नमः' तक हैं। फिर दाहिने पैर को आगे कर अपने अंगों को संकुचित करते हुए पूजा गृह में प्रवेश करे। फिर पूजा गृह की पूजा करे। ऐशान्य दिशा में 'ॐ वास्तु पुरुषायनमः ॐ ब्रह्मणे नमः' कहे। फिर अपसंपन्तु मन्त्र से भूत निःसारणार्थं चारों दिशाओं में अक्षत छोड़े। ऊपर-ऊपर, तीन बार तालियाँ बजाकर तीनों प्रकार के विघ्नों को अपने बायें पैर के तीन बार के धमाके से भूतो त्सारण करे। तब व्याघ्राजिन, रक्तकम्बल आदि के आसन में बैठने के पूर्व विनियोग करे, पृथ्वी से प्रार्थना करे। 'कूं कूर्मासनाय नमः से पृथि० यै नमः' तक मन्त्र पढ़े। स्वस्ति मन्त्र पढ़कर ऐं ह्लीं से पैरों, जंघाओं पार्श्व, गुह्य आदि का शोधन करे। आसन के चारों कोनों की पूजा करे उपरिलिखित मन्त्र पढ़े। **अथ भूत शुद्धि**—अपने दोनों हाथ ऊपर उठाकर 'सोहं' मन्त्र से मूलाधार में कुण्डलिनी को हूँकार के द्वारा मनोमय दण्ड से मारकर उठाये और स्वाधिष्ठान मणिपूरक जीवात्मा अनन्ता के साथ विशुद्ध चक्र को भेदकर सहस्रदलकमल के अन्तर्गत बिन्दु रूप में परम शिव का संयोजन करे। अपने शरीर को शून्य समझकर अपनी कुक्षि में पाप पुरुष का ध्यान

ञ्चस्वंर्णस्तेयभुजद्वयम् ।। सुरापानहृदा युक्तङ्गुरुतल्पकटिद्वयम् ।। तत्सँयोगिपद-द्वन्द्वमङ्गप्रत्यङ्गपातकम् ।। उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ।। अचेतनम-धोवक्त्रन्दग्धपादपसन्निभम् ।। खड्गचर्मधरङ्क्रूरम्पापकुक्षौ विचिन्तयेत् ।। इति ध्यात्वा तेन सह शोषणादिकङ्कुर्य्यात् ।। वामनासापुटेन यमिति वायुबीजन्धूम्र-वर्णं षोडशवारञ्जपन् वायुमुत्तोल्य नाभौ दशदले नियोज्य समस्तशरीरम्पाप-पुरुषेण संशोषयेत् । नासापुटौ धृत्वा रमिति बीजं रक्तवर्णञ्चतुः षष्टिवारान् जपन् कुम्भकयोगेन शरीरन्तेन सह भस्मीकुर्य्यात् । वायुमुत्तोल्य हृदि द्वादशदले नियोज्य वमिति वरुणबीजं शुक्लवर्णन्द्वात्रिंशद्वारञ्जपन् अमृतधाराम्पातयित्वा चमिति चन्द्रबीजञ्चतुः षष्टिवराञ्जपन् अमृतवृष्टया कुम्भकयोगेनाप्लाव्य लमिति भूमिबीजम्पीतवर्णम्मूलाधारस्तम्भूमण्डले नियोज्य समस्तशरीरम्पुनर्द्देवतारा-धनयोग्यं शरीरन्दृढीकुर्व्वन् हंस इति मन्त्रेण जीवात्मानं हृदयचक्रे नयेत् ।। कुण्डलिनीम्मूलचक्रन्नयेत् ।। इति भूतशुद्धिः ।। ततो हृदि हस्तन्दत्त्वा प्राणप्रतिष्ठा-ङ्कुर्य्यात् । अस्य प्राणप्रतिष्ठामन्त्रस्यब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुः सामानि च्छन्दांसि चैतन्यशक्ति ⌒ परमात्मा देवता प्राणप्रतिष्ठायाँ व्विनियोगः । आँ ह्रीं क्रीं यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ हँ सः मम प्राणाः मम जीव इह स्थितः ।।१५।। ममेह सर्व्वेन्द्रियाणि ।।१५।। मम वाङ्मनश्चक्षुः श्रोत्रघ्राणत्वग्रसनाप्राणा इहा-गत्य सुखञ्चिरन्तिष्ठन्तु स्वाहा ।। अथ प्राणायामः ।। वामनासापुटन्धृत्वा कएईल-

---

करे । 'वामकुक्षौ० से पाप कुक्षौ विचिन्तयेत्' तक । इसके उपरान्त वायुबीज 'यं' १६ बार कहकर वामनासापुट से वायु को साधकर नाभि से दशदल तक लावे इस प्रकार समस्तशरीर को पाप पुरुष से संशोषित करे तदनन्तर दोनों नासापुटों को बन्दकर 'रं' इस बीज मन्त्र से रक्तवर्ण का ध्यान करते हुए ६४ बार जप करे । जप करते हुए कुम्भकयोग के द्वारा शरीर को भस्म करे । फिर वायुसाधकर 'वं' इस वरुण बीज मन्त्र से शुक्लवर्ण का ध्यान करते हुए ३२ बार जप करे । अमृत धारा का पात समझते हुए 'चं' चन्द्र बीज से ६४ बार जप करते हुए अमृत वर्षा से कुम्भक योग से आप्लावित कर 'लं' भूमि बीज मन्त्र से पीतवर्ण का ध्यान करते हुए अपने शरीर को पुनः देवाराधन योग्य दृढ़ करके "हं सः" इस मन्त्र से जीवात्मा को हृदय चक्र में धारण करे। कुण्डलिनी को मूल चक्र में ले जाये । यह भूत शुद्धि हुई । फिर अपने हृदय में हाथ रखकर प्राण प्रतिष्ठा करे, अस्य प्राण प्रतिष्ठा० से चिरन्तिष्ठन्तु स्वाहा तक ।

अथ प्राणायाम—वायीं नासिका के छिद्र को दबाकर 'क ए ई ल ह्रीं' इस मन्त्र को १६ बार जपे वायु को धीरे-धीरे पूर्ण कर पूरक करे । दोनों नासा

ह्लीं मिति षोडशवारञ्जपन् वायुना शनैः शनैः पूरयेदिति पूरकः । नासापुटौ धृत्वा हसकहलह्लीं इतिचतुःष्षष्टिवारञ्जन् वायुङ्कुम्भयेत् ।। इति कुम्भकः । सकलह्लींमिति बीजन्द्वात्रिंशद्वारञ्जपन् वायुन्दक्षनासापुटेन शनैः रेचयेत् ।। इतिरेचकः एवम्प्राणायामत्रयङ्कुर्य्यात् । [अथ मातृकान्यासः ।] अस्य श्रीमातृका न्यासमन्त्रस्य ब्रह्मर्षिर्गायत्रीछन्दो वर्णजननी मातृकादेवता हलोबीजानि स्वराः शक्तयः कर्म्मसाद्गुण्ये विनियोगः ।। ब्रह्मर्षयेनमः शिरसि, गायत्री छन्दसेनमः मुखे, वर्ण्णजननी मातृकादेवतायैनमः हृदि, हल्बीजेभ्योनमः गुह्ये, स्वरेभ्यः शक्तिभ्योनमः गुदे, कर्म्मसाद्गुण्ये विनियोगः पादयोः । मातृकान्ध्यायेत् । पञ्चाशल्लिपिभिर्व्विभक्तसुखदोष्काम्मध्यवक्षः स्थलां भासन्मौलिनिबद्धचन्द्रसकलामापीनपिङ्गस्तनीम् ।। अद्रामक्षगुणं सुधाढ्यकलशं विद्यां सुहस्ताम्बुजे बिभ्राणां व्विशद प्रभान्त्रिनयनाँ व्वाग्देवतामाश्रये ।। अंनमः ललाटे । आंनमः मुखवृत्ते । इंनमः दक्षनेत्रे ईंनमः वामनेत्रे उंनमः दक्षकर्ण्णे । ऊंनमः वामकर्ण्णे । ऋंनमः दक्षनासापुटे । ॠंनमः वामनासापुटे । लृंनमः दक्ष गण्डे । लॄंनमः वामगण्डे । एं नमः ओष्ठे । ऐं नमः अधरे । ओं नमः ऊद्ध्र्वदन्तपङ्क्तौ । औं नमः अधोदन्तपङ्क्तौ । अं नमः शिरसि । अः नमः मुखे । दक्षबाहुपञ्चसन्ध्यग्रेषु—कँ नमः खँ नमः गँ नमः घँ नमः ङँ नमः । वामबाहुपञ्चसन्ध्यग्रेषु—चँ नमः छँ नमः जँ नमः झँ नमः ञँ नमः । दक्षपादपञ्चसन्ध्यग्रेषु—टँ नमः ठँ नमः डँ नमः ढँ नमः णँ नमः । वामपादपञ्चसन्ध्यग्रेषु—तँ नमः थँ नमः दँ नमः धँ नमः नँ नमः । दक्षपाश्श्र्वे—पँ नमः फँ नमः । वामपाश्श्र्वे—बँ नमः पृष्ठे । भँ नमः नाभौ । मँ नमः उदरे । यँ नमः हृदये । रँ नमः दक्षांसे । लँ नमः ककुदि । वँ नमः वामांसे । शँ नमः हृदयादिदक्षहस्ते । षँ नमः हृदयादिवामहस्ते । सँ नमः हृदयादिदक्षपादे । हँ नमः हृदयादिवामपादे । लँ नमः हृदयादिउदरे । क्षँ नमः हृदयादिमुखे । इति मातृकान्यासः ।। [अथान्तर्म्मातृकान्यासः] कण्ठे षोडशस्वरान् रक्तवर्ण्णान् । हृदि कादि-ठान्तान् सिन्दूरवर्णान् ।

रन्ध्रों को रोककर "ह स क ह ल ह्लीं" इस मन्त्र को ६४ बार जप कर वायु का कुम्भक करे । फिर "स क ल ह्लीं" इस बीज मन्त्र को ३२ बार जपते हुए दाहिने नासापुट से शनैः शनैः वायु का रेचन करे । इस प्रकार प्राणायाम विधि समाप्त हुई । अथ मातृ का न्यास—अस्य श्री मातृ का न्यास मन्त्रस्य० से विनियोग करे । शिर-मुख हृदय-गुह्य गुदा में न्यासोपरान्त मातृका का ध्यान करे पञ्चाशल्लिपि० से । फिर अपने प्रत्येक अंग में न्यास करे ।

० **अथ अन्तर्मातृका न्यास**—कण्ठ में रक्तवर्ण का ध्यान करते हुए "अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ लॄँ एँ ऐं ओं औं अँ अः" इन सोलह स्वरों का उच्चारण करे। हृदय में कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ झँ टँ ठँ सिन्दूरवर्ण । नाभि में डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ नीलवर्ण । लिंग में बँ भँ मँ यँ रँ लँ तडिदवर्ण

नाभौ डादि-फान्तान्नीलवर्णान् । लिङ्गे बादि-लान्तान्तडिद्वर्ण्णान् । गुदे वादि-सान्तान् रक्तवर्ण्णान् । भ्रूमध्ये हँ क्षँ विमलवर्णान् । सहस्रारे सहस्रदले अकारादि-क्षका रान्ताँ ल्लाक्षारसवर्ण्णान् पञ्चाश द्वर्ण्णान् । एवङ् क्रमेण द्विरावृत्तौ तृतीया-वृत्ती च विंशत्यावृत्तिपर्य्यन्तं सहस्रधा न्यसेत् । मूलाधारभारभ्य सहस्रदलपर्य्यन्तं सर्व्वत्र सर्व्वदलेषु मूलमन्त्रन्नसेत् । प्रतिदलम्प्रतिकमलम्प्रतिचक्रङ्कुण्डलिन्या गतागतेन एकविंशतिशतं जपम्प्रतिश्वासान्भावयेदित्यजपा ।। अन्तर्म्मातृकान्यासश्च सदा सावधानेन कर्त्तव्यः ।। इत्यन्तर्म्मातृकान्यासः ।। [अथ कुलुकान्यासः ।] ऐं क्लीं ह्रीं श्रीं भगवतिमहात्रिपुरसुन्दरिस्वाहा । इति कुलुकां शिरसि ओं हृदि सेतुं ह्रीं महासेतुं कण्ठे ह्रींमहासेतुं सहस्रारे ओं श्रीं अँ एँ क्लीं सौं ऐं अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ लॄँ एँ ऐं ओं औं अँ अः कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ बँ भँ मँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ इति निर्व्वाणनाभौ लिङ्गे कामबीजं जिह्वायाँ मूलविद्याँ विचिन्त्य यथा शक्ति जपेत् । इति कुलुकान्यासः ।। [अथ पीठन्यासः] ललाटे अँकामरूपपीठाय, नमः सर्व्वत्र । मुखवृत्ते आँवाराणसी-पीठाय, दक्षनेत्रे इँनेपालपीठाय, वामनेत्रे ईँपौण्ड्रवर्द्धनपीठाय, दक्षकर्ण्णे उँपुरस्तिर-पीठाय, वामकर्ण्णे ऊँकालिकुब्जिपीठाय, दक्षिणनासिकायां ऋँपूर्ण्णशैलपीठाय, वामनासापुटे ॠँअर्ब्बुदपीठाय, दक्षगण्डे लृँआम्रातकेश्वरपीठाय, वामगण्डे लॄँ एका-म्रपीठाय, ओष्ठे एँत्रिस्रोतपीठाय, अधरे ऐंकामकोटपोठाय, ऊद्ध्र्वदण्तपङ्क्तौ ओं केदारपीठाय, अघोदन्तपङ्क्तौ औंगुप्तनगरपीठाय, शिरसि अँचन्द्रपुरपीठाय, मुखे अः श्रीपीठाय, दक्षकरपञ्चसन्ध्यग्रेषु कँओंकारपीठाय, खँजालन्धरपीठाय, गँमान-पीठाय, घँभद्रकोटपीठाय, ङँदेवीकोटपीठाय ।। वामकरपञ्चसन्ध्यग्रेषु चँगोकर्ण-पीठाय, छँमारुतेश्वरपीठाय, जँमङ्गलकोटपीठाय, झँअट्टहासपीठाय, ञँविरज-पीठाय ।। दक्षपादपञ्चसन्ध्यग्रेषु टँराजगृहपीठाय, ठँमहापथपीठाय, डँकोणगिरि-पीठाय, ढँऐलापुरपीठाय, णँरामेश्वरपीठाय ।। वामपादपञ्चसन्ध्यग्रेषु तंजपती-पीठाय, थंउज्जयिनीपीठाय, दंचरित्रीपीठाय, धंक्षीरिकापीठाय, नंहस्तिनापुर-

---

गुदा में वं शं षं सं रक्त वर्ण । भ्रूमध्य में हं क्षं विमलवर्ण । सहस्रदल सह-स्रार में अ से लेकर क्ष तक ५० लाक्षावर्ण । इस प्रकार द्वितीयावृत्ति तृतीया-वृत्ति करते हुए बीस आवृत्ति करके १००० बार न्यास करे । मूलाधार से लेकर सहस्रदल पर्यन्त सर्वत्र सब दलों में मूलमन्त्र से न्यास करे । प्रतिदल प्रतिकमल प्रतिचक्र में कुण्डलिनी द्वारा २१०० बार प्रतिश्वास से अजपा जप करे । अन्तर्मातृकान्यास बड़ी ही सावधानी से करे । इतिमातृका न्यास । अब कुलुना न्यास ऐं क्लीं: मन्त्र का जप करे ।

० **तत्पश्चात् पीठन्यास करे**—ललाटे अँ काम रूप पीठाय नमः से लेकर सर्व्व-व्यापक पीठाय नमः तक पीठन्यास करे ।

पीठाय ।। दक्षपाश्श्र्वे पंउड्डीशपीठाय, वामपाश्श्र्वे फंप्रयागपीठाय, पृष्ठे बँषष्ठीशपीठाय, नाभौ भँमायापुरपीठाय, उदरे मँनिर्ज्जनपीठाय, हृदये यँभलयपीठाय, दक्षांसे रंश्रीशैलपीठाय, ककुदि लंमहामेरुपीठाय, वामांसे वंगिरिपीठाय ।। हृदयादिदक्षहस्तपर्य्यन्ते शंमहेन्द्रपीठाय, हृदयादिवामहस्तपर्य्यन्तं षंरसेनपीठाय ।। हृदयादि दक्षपादपर्य्यन्तं सँवदरीपीठाय, हृदयादिवामपादपर्य्यन्तं हंमहालक्ष्मीपुरपीठाय, हृदयादिउदरपर्य्यन्तं ळँउड्डीमानपुरपीठाय, हृदयादिमुखपर्य्यन्तं क्षँसौम्यपीठाय नमः । ततो मूलाधारे ध्यानपीठानमः स्वाधिष्ठाने कामपीठायनमः मणिपूरे ज्ञानपीठायनमः अनाहते विदेहपीठायनमः विशुद्धौ नन्दिनीपीठाय० आज्ञायां नन्दापीठाय० ।। ततः सहस्रदलेषु क्षीरनिधिपीठाय० कल्पवनपीठाय० चिन्तामणिपीठाय० पर्य्यङ्कपीठाय० शिवासनपीठाय० मूर्त्तिमयपीठाय० सर्व्वव्यापकपीठाय० ।। इतिपीठन्यासः ।। [अथ रहस्यन्यासः] अस्य श्रीरहस्यन्यासमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुस्सामानि च्छन्दांसि चैतन्यशक्तिमहात्रिपुरसुन्दरी देवता कृताकृतन्यासपूर्णतासिद्धये विनियोगः पादयोः । ऐं क्लीं सौं क्लीं ऐं श्रीं ह्रीं हं सः सोहं सदाशिवासनायै महात्रिपुरसुन्दर्य्यै नमः इति मूलाधारे ।।१।। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हं सः सोहं रतिप्रियायै महात्रिपुरसुन्दर्य्यै नमः इतिस्वाधिष्ठाने ।।२।। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हं सः सोहं ज्ञानस्वरूपायै महात्रिपुरसुन्दर्य्यैनमः इतिमणिपूरे ।।३।। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहंध्यानस्वरूपायै महात्रिपुरसुन्दर्य्यैनमः इतिअनाहते ।।४।। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं विशुद्धस्वरूपायै महात्रिपुरसुन्दर्य्यैनमः इतिविशुद्धौ ।।५।। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं स्वतन्त्रस्वरूपायै महात्रिपुरसुन्दर्य्यैनमः इत्याज्ञायाम् ।।६।। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं आनन्दस्वरूपायै महासुन्दर्य्यैनमः इतिसहस्रारे न्यसेत् ।। इति रहस्यन्यासः ।। [अथ कामन्यासः] ह्रींकामायनमः, क्लींमन्मथाय०, ऐंकन्दर्प्पयाय०, क्लूंमकरध्वजायनमः स्त्रींमीनकेतवेनमः ।। तत ऐंहृदयायनमः, क्लींशिरसेस्वाहा, सौंशिखायैवषट्, ऐंकवचायहुम्, क्लींनेत्रत्रयायवौषट्, सौं अस्त्रायफट् । इतिद्विरावृत्य मन्त्रेण करयोर्व्विन्यसेत् ।। इतिकामन्यासः ।। [अथ रत्यादिन्यासः] लिङ्गे ऐंरत्यैनमः हृदि क्लीं प्रीत्यैनमः भ्रूमध्ये सौंमनोभवायै० भ्रूमध्ये सौं अमृताश्यै० हृदि क्लींयोगिन्यै० लिङ्गे ऐंविश्योन्यैनमः ।। इतिरतिन्यासः ।। [अथ मनोभवन्यासः] शिरसि हसौंईशानाय मनोभवायनमः, मुखे

---

० अथ रहस्यन्यास—'अस्य श्रीं रहस्यन्यास मन्त्रस्य' से लेकर 'महासुन्दर्यै नमः' तक मूलाधार स्वाधिष्ठान, मणिपूरक, अनाहत, विशुद्ध, आज्ञा और सहस्रार में रहस्यन्यास उपरिलिखित क्रम से करे ।

० अथ कामन्यास—'ह्रीं कामाय नमः' से 'सौंअस्त्राय फट्' तक । इस प्रकार दो बार मन्त्रों से कामन्यास करे ।

ह्सौंतत्पुरुषाय मकरध्वजायनमः, हृदि स्ह्रुंअघोरकुमाराय कन्दर्प्पाय०, गुह्ये- ह्स्त्रींवामदेवाय मन्मथाय०, पादयोः ह्स्त्रूंसद्योजाताय कामदेवायनमः, ऊर्द्ध्वे वक्त्रे मस्तके ह्स्त्रौंईशानाय मनोभवाय०, पूर्व्ववक्त्रे भाले ह्स्त्रौंतत्पुरुषाय मकर- ध्वजाय०, दक्षिणवक्त्रे दक्षकर्ण्णे ह्स्त्रूंअघोरकुमाराय कन्दर्प्पाय०, उत्तरवक्त्रे वामकर्ण्णे ह्स्त्रींवामदेवाय मन्मथाय०, पश्चिमवक्त्रे चूडाधः ह्स्त्रूंसद्योजाताय कामदेवायनमः ।। इति मनोभवन्यासः ।। [अथ वाणन्यासः] ह्लाँक्षोभणबाणायनमः, ह्लींद्रावणबाणाय०, क्लींआकर्ष्षणवाणाय०, ल्कूंमोहनवाणायनमः, सःउन्मादनवा- णायनमः ।। इति अङ्गुष्ठादिकनिष्ठान्तङ्करयोर्न्यसेत् ।। इति बाणन्यासः ।। [अथ स्वतन्त्रन्यासः] अस्य श्रीमहात्रिपुरसुन्दरीस्वतन्त्रन्यासस्य आनन्द भैरव ऋषिर्द्दैवी गायत्रीच्छन्दः श्रीमहात्रिपुरसुन्दरी देवता ऐंबीजं सौः शक्तिः क्लींकीलकं धर्म्मार्त्थकाममोक्षार्थे विनियोगः ।। आनन्दभैरवऋषयेनमः शिरसि, दैवीगायत्री छन्दसेनमः मुखे, श्रीमहात्रिपुरसुन्दरीदेवतायै नमः हृदये, ऐं बीजाय नमः नाभौ, सौः शक्तयेनमः स्वाधिष्ठाने, क्लींकीलकायनमः मूलाधारे धर्म्मार्थिकाममोक्षार्त्थे विनियोगः पादयोः । ऐं ह्रीं क्लीं अंगुष्ठाभ्यान्नमः क्लीं श्रीं सौः ऐं तर्ज्जनीभ्यां स्वाहा, सौः औं ह्रीं श्रीं मध्यमाभ्यां व्वषट् ऐंकएलह्रीं हसकहल्ह्रीं अनामिका- भ्यांहूम्, क्लींसकलह्रीं कनिष्ठिकाभ्यांवौषट्, सौ सौः ऐंक्लींह्रींश्रीं करतलकर पृष्ठाभ्याम्फट्, ऐंह्रींश्रींऐंकएलह्रीं सर्व्वज्ञायै महात्रिपुरसुन्दर्य्यै हृदयायनमः ऐंह्रीं- श्रीं सौः सकलह्रीं अनादिबोधायै महात्रिपुरसुन्दर्य्यै शिखायैवषट् ऐंह्रींश्रींकएलह्रीं स्वतन्त्रायै महात्रिपुरसुन्दर्यै कवचायहुम् ऐंह्रींश्रींक्लींहसकहलह्रीं नित्यमलुप्तशक्तये महात्रिपुरसुन्दर्य्यै नेत्रत्रयायवौषट् ऐंह्रींश्रीं सौः सकलह्रीं अनन्तायै महात्रिपुर- सुन्दर्य्यै अस्त्रायफट् हःअस्त्रायफट् इतिदिग्बन्धः ।। इतिस्वतन्त्रन्यासः ।। [अथ चतुर्द्दशारचक्रन्यासः] ऐंशिरसि, क्लीं सौः भ्रुवोः ऐंललाटे, क्लीं सौः श्रोत्रयोः, ऐंभ्रूमध्ये, क्लीं सौः नेत्रयोः, ऐंशिरसि, क्लीं सौः नासिकयोः, ऐंचिबुके, क्लीं सौः

अथ रत्यादिन्यास—"लिंग ऐं रत्यै नमः" से "ऐं विश्व योन्यै नमः" तक रतिन्यास करे।

अथ मनोभव न्यास—"शिरसि ह्सौं ईशानय' मनोभवायनमः" से लेकर "कामदेवाय नमः तक" मनोभवन्यास करे।

अथ बाण न्यास—"ह्लांक्षोभबाणाय नमः" से "सः उन्मादन बाणाय नमः" तक अंगुष्ठ से कनिष्ठिका तक बाणन्यास करे।

अथ स्वतन्त्र न्यास—"अस्य श्रीमहात्रिपुरसुन्दरी स्वतन्त्र न्यासस्य०" से विनि- योग कर अंग न्यास पूर्वक दिग्बन्ध करे।

अथ चतुर्दशार चक्र न्यास—"ऐं शिरसि०" इत्यादि कहकर अंग न्यास करे।

ओष्ठयोः, ऐं नासिकायाम्, क्लीं सौः गण्डयोः, ऐंगले, क्लीं सौः वाहुमूलयोः, ऐंकण्ठे, क्लीं सौः वाह्वोः, ऐंचिबुके क्लीं सौः स्तनयोः, ऐंहृदये, क्लीं सौः पार्श्वयोः, ऐं नाभौ, क्लींसौः स्तनयोः, ऐंहृदये, क्लींसौः करयोः, ऐंलिङ्गे, क्लींसौः त्रिकयोः, ऐंपृष्ठे, क्लींसौः नितम्बयोः, ऐंक्लींसौः भूलञ्च सर्व्वाधारायनमः इति मूलाधारे ॥ इति चतुर्द्दशारन्यासः ॥ [ततोऽङ्गदेवतान्यासः ॥] अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः क्लींरसिनीवाग्देवतायैनमश्शिरसि, कं खं गं घं ङं क्लींकामेश्वरीवाग्देवतायैनमः ललाटे, चं छं जं झं ञं श्रींमोदनीवाग्देवतायैनमः मुखे, टं ठं डं ढं णं कुंविमलाननावाग्देवतायैनमः कण्ठे, तं थं दं धं नं श्रींअव्ययग्रावाग्देवतायैनमः हृदये, पं फं बं भं मं श्रींजयिनीवाग्देवतायैनमः नाभौ, यं रं लं वं क्ष्मींवाग्देवतायैनमः मूलाधारे, शं षं सं हं ळं सं क्षं हं क्ष्मींकौलिनीवाग्देवतायैनमः इतिपादयोः इत्यङ्गदेवतान्यासः ॥ [अथ मन्त्रन्यासः] प्रथमवीजं शिरसि । द्वितीय वीजं मुखे । तृतीयवीजं हृदये । ततः समस्तमूलमन्त्रं शिरस्त〰पादपर्य्यन्तन्नियसेत् ॥ इति मन्त्रन्यासङ्कृत्वा पीठन्यासङ्कुर्य्यात् । प्रथमं हृदये ऐं आधारशक्ति कमलासनायनमः ऐंअनन्तायनमः ऐंपृथिव्यैनमः ऐंरससमुद्रायनमः ऐंरत्नद्वीपायनमः ऐंकल्पवृक्षायनमः ऐंरत्नमण्डपायनमः दक्षस्कन्धे धर्म्मायनमः वामस्कन्धे ज्ञानायनमः दक्षोरौ वैरासनायनमः वामोरौ ऐश्वर्य्यायनमः मुखे अधर्म्मायनमः दक्षपार्श्वे ज्ञानायनमः वामपार्श्वे अनैश्वर्य्यायनमः नाभौ अवैराग्यायनमः हृदये अनन्तायनमः पद्मायनमः ॐ अवर्कमण्डलायनमः ॐ सोममण्डलायनमः मँवह्निमण्डलायनमः सँसत्त्वायनमः रँरजसेनमः तँतमसेनमः हैहेछ्रींहसौः चक्रासनायनमः सत्त्वमन्त्रासनायनमः साध्यसिद्धासनायनमः ॥ ततो हृत्पद्मचक्रन्ध्यात्वा तदुपरिवेदीङ्गन्धपुष्पाक्षतै〰 करकच्छपमुद्राम्वद्ध्वा ध्यायेत् ॥ सकुङ्कुमित्यादि । वालार्क्कमण्डलाभासाञ्चतुर्व्वाहुन्त्रिलोचनाम् । पोशाङ्कुशौ शरांश्चापन्धारयन्तीं शिवां श्रये ॥ शिरसि पुष्पन्दत्वा गुरुभ्योनमः । परमगुरुभ्योनमः परात्परगुरुभ्योनमः परमेष्ठि-

---

अङ्ग देवता न्यास—'अं आं इं ईं०' मन्त्र को पढ़ते हुए अङ्गन्यास करे।

मन्त्र न्यास—प्रथम वीजं शिरसि० को पढ़ते हुए मन्त्र न्यास करे।

पीठ न्यास—'प्रथमं हृदये० से साध्य सिद्धासनाय नमः' तक अंगन्यास पूर्वक पीठ न्यास करे।

इसके पश्चात् हृदयस्थ कमल चक्र का ध्यान करे और उसके ऊपर बनी हुई वेदी को गन्ध पुष्पाक्षत से पूजा करे। इस अवसर पर कच्छप मुद्रा प्रदर्शित करे।

कुंकुम चढ़ावे। 'वालार्कमण्डलाभासां०' मन्त्र से भगवती का ध्यान करे और शिर में पुष्प रखकर गुरुपरम गुरु, परात्पर गुरु और परमेष्ठि गुरुओं को प्रणाम करे। फिर मन्त्र में देवी की पूजा कर आवाहन मुद्रा एवं योनि मुद्रा का

गुरुभ्योनमः। मनसा देवीं सम्पूज्य आवाहनमुद्रां य्योनिमुद्राम्प्रदर्श्य ततोऽर्घ्यं-स्थापनङ्कुर्य्यात्। सौः अस्त्रायफट्इति शङ्खम्प्रक्षाल्य भूमौ त्रिकोणमण्डलङ्कृत्वा ॐ आधारशक्त्यैनमः कूर्म्मायनमः अनन्तायनमऽपूजयेत्। तदुपरि नमइति प्रक्षा-लितान्त्रिपदीन्निधाय तदुपरि शङ्खन्निधाय त्रिधा मूलेनापूर्य्य दूर्व्वाक्षतादि निऽ क्षिप्य मदंशकलात्मने सूर्य्यमण्डलाय नमइति त्रिपदीं सम्पूज्य अँद्वादशकलात्मने वह्निमण्ड ायनम इतिजले पूजयेत्। उँसोममण्डलायषोडशकलात्मनेनमः। ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति॥ नर्म्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिङ्कुरु॥ इति सूर्य्यमण्डलात्तीर्थमङ्कुशमुद्रयानीय अवगुण्ठनमुद्रयावगुण्ठ्य मूलमष्टधा जप्त्वा योनि मुद्राम्प्रदर्श्य अमृतीकृत्य धेनुमुद्रया पुनर्म्मूलमष्टधा जपित्वा तेनोदकेनाभ्युक्ष्य स्थापयेदिति। ततो विशेषार्घ्यस्थापनम्। स्वपुरतऽकिञ्चिद्वामभागे सामा-न्यार्घ्यस्य तोयेनाभ्युक्ष्य त्रिकोणवृत्तगर्भितवृत्तात्मकं षट्कोणवृत्तचतुरस्रमण्डल-ङ्कृत्वा अग्न्यादिकोणचतुष्टये पूजयेत्। ॐ उड्डीयानश्रीपादुकाम्पूजयामिनमः जांजालन्धरश्रीपादुकाम्पूजयामिनमः पूंपूर्ण्ण शैलश्रीपादुकाम्पूजयामिनमः कांका-मरूप श्रीपादुकाम्पूजयानिमः। मूलेन नामोच्चार्य्य आधारमण्डलायनम इत्याधारं सम्पूज्य सौः अस्त्रायफट्नम इति त्रिपदीं सम्पूज्य मण्डले स्थापयित्वा पूज्यते। भँवह्निमण्डलाय दशकलात्मनेनमः। ततः सौः अस्त्रायफट्नम इतिशङ्खम्प्रक्षाल्य स्थापयित्वा अंसूर्य्यमण्डलाय द्वादशकलात्मने नमः श्रीमहात्रिपुरसुन्दर्य्यर्घ्यपात्रा-यनम इतिशङ्खं सम्पूज्य उंसोममण्डलाय षोडशकलात्मने श्रीमहात्रिपुरसुन्दर्य्या-र्घ्यमृतायनमं इतिजलेनापूर्य्य तत्र जले दूर्व्वाक्षतादि दत्त्वा ॐ गङ्गे च यमुने चैवे-त्यादिना सूर्य्यमण्डलादङ्कुशमुद्रया तीर्थमावाह्य धेनुमुद्रयामृतीकृत्य योनिमुद्रा-म्प्रदर्श्य तदुपरि मूलमष्टधा जपित्वा दक्षाङ्गुष्ठेन जलं स्पृष्ट्वा मूलं स्मृत्वा

प्रदर्शन करे तब अर्घ्य स्थापित करे। 'सौः अस्त्राय फट्' कहकर शंख को धोकर स्वच्छ करले फिर भूमि में त्रिकोण मण्डल बनाकर आधार शक्ति कूर्म एवं अनन्त की पूजा के मन्त्र पढ़े। तथा शंख को स्वच्छ त्रिपदी के ऊपरस्थापित करे और शंख में तीन बार मूल मन्त्र पढ़कर दूर्वा अक्षत और जल छोड़े।

'मन्दशकलात्मने नमः' कहकर त्रिपदी की पूजा करें। 'अंद्वादश कलात्मने०' कहकर जल में पूजा करे। 'ॐ सोममण्डलाय' आदि कहकर सूर्य मण्डल से समस्त-तीर्थों को अंकुश मुद्रा से लाकर अवगुण्ठन मुद्रा से अवगुण्ठित करे। मूल मन्त्र को ८ बार जपे। योनि मुद्रा का प्रदर्शन करे जल को अमृत मानकर धेनु मुद्रा दिखावे तथा पुनः ८ बार मूल मन्त्र का जप करे फिर उस जल से भूमि को अभिषिक्त कर अर्घ्यस्थापित करे।

विशेषार्घ्य स्थापन—अपने आगे बाईं ओर सामान्य अर्घ्य के जल से अभिषि-चित कर भूमि में वृत्त गर्भित वृत्तात्मक षट्कोण वृत्त चौकोर मण्डल के अन्दर

अर्घ्यंजलस्य आग्नेयकोणमारभ्य विन्यसेत् । हृदयाथनमः शिरसे स्वाहा शिखायै-वौषट् अस्त्रायफट् ।। इतिचतुर्द्दिक्षु विन्यस्य 'ह्रीं' इतिमन्त्रेण सम्पूज्य पञ्चरत्नानि विन्यसेत् । ग्लूं श्लूं प्लूं म्लूं ज्लूमिति पञ्चरत्नानि स्वर्गमर्त्यपातालगमनरत्नानि विन्यसेत् । मत्स्यमुद्रयाच्छाद्य संरक्षणमुद्रया संरक्ष्य अवगुण्ठनमुद्रया अवगुण्ठ्य अमृतीकरणमुद्रया अमृतीकृत्य प्रबोधनमुद्रया प्रबोध्य मूलं स्मृत्वा । अकुलस्थामृताकरे सिद्धिज्ञानकरे परे । अमृतत्वनिधं त्वस्मिन् वस्तुनि क्लिन्नरुपिणि ।। इति-जलमभिमन्त्र्य तज्जलेनात्मानम्पूजोपकरणञ्चाभ्युक्ष्य पीठपूजामारभेत् । ऐंह्रींनम इतिकुशजलेन भूमिं शोधयित्वा त्रिपदीमारोप्य पूजयेत् । ऐंआधारशक्ति कमलासना सनायनमः कुर्म्मायनमः अनन्तायनमः पृथिव्यै रसाम्बुधयेनमः रत्नद्वीपायनमः नन्दनोद्यानायनमः रत्नमण्डपायनमः रत्नवेदिकायैनमः रत्नसिंहासनायनमः श्री-चक्रायनमः । ततो ह्रमितिमन्त्रेण ताम्रपीठँ विशोध्य श्रीयन्त्रं स्थापयित्वा पीठस्य आग्नेयादिकोण चतुष्टयम्पूजयेत् । धर्मायनमः ज्ञानायनमः वैराग्यायनमः ऐश्वर्य्याय-नमः । तत ऽपूर्व्वादिचतुर्द्दिक्षु । अधर्म्मायनमः अज्ञानायनमः अवैराग्यायनमः । अनैश्वर्य्यायनमः । पीठस्योपरि-आनन्द कन्दायनमः सँव्विन्नालायनमः सर्व्वतत्त्वानुकम्पायनमः । पञ्चाशद्वर्णकर्णिकायैनमः विकारमयकेसरेभ्योनमः प्रकृतिमयपत्रेभ्योनमः । मंवह्निमण्डलायनमः, ॐ सूर्य्यमण्डलाय नमः अँसोममण्डलायनमः संसत्त्वायनमः रंरजसेनमः तंतमसेनमः आं आत्मनेनमः अंअन्तरात्मनेनमः पंपरमात्मनेनमः ह्रींज्ञानात्मनेनमः ऐंकामरूपपीठायनमः ।। ऐंपूर्णगिरिपीठायनमः ऐंजालन्धर-पीठायनमः ऐंउड्डीयानपीठायनमः ।। इतिसम्पूज्य ।। ऐंत्रिपुरेश्वरी मध्यमाभ्यान्न-नमः । क्लींत्रिपुरेश्वरी अनामिकाभ्यान्नमः । सौंत्रिपुरेश्वरी कनिष्ठाभ्यान्नमः । ऐंत्रिपुरेश्वरी अंगुष्ठाभ्यान्नमः । क्लीं त्रिपुरेश्वरी तर्ज्जनीभ्यान्नमः । सौः त्रिपुरेश्वरी करतलकरपृष्ठाभ्यान्नमः । ह्रीं क्लीं सौः देव्यासनायनमः । चक्रासनायनमः सर्व्व-मन्त्रासनायनमः साध्यसिद्धासनायनमः । ऐंत्रिपुरेश्वरी हृदयायनमः क्लींत्रिपुरेश्वरी

कर अग्निकोण आदि चारों कोणों की पूजा करे । तत्पश्चात् 'उड्डीयान श्री पादुकां पूजयामि०' कहकर आधार की पूजा करे । त्रिपदी की पूजा करे । मंडल में अर्घ्यं को स्थापित करे । 'मं वह्नि मंडल० से अस्त्राय फट्' तक मन्त्र पढ़ कर शंख को स्वच्छ करे । शंख में अर्घ्यपात्र का पूजन करे । जल छोड़े दूर्वा अक्षत अर्पित करे । 'ॐ गंगे च यमुने चैव० कहकर सूर्य मंडल से अंकुश मुद्रा दिखाकर तीर्थों का आवाहन करे । धेनु मुद्रा से जल को अमृत बनावे योनि मुद्रा का प्रदर्शन करे । आठ बार मूल मन्त्र का जप करे । दाहिने अंगुष्ठ से जल का स्पर्श करे । मूल का स्मरण कर अर्घ्य जल के आग्नेय कोण में विशेष अर्घ्य की स्थापना करे । 'हृदयायनमः से अस्त्रायफट्' तक चतुर्दिङ् न्यास

शिरसेस्वाहा। सौः त्रिपुरेश्वरी शिखायैवषट्। ऐंत्रिपुरेश्वरी कवचायहूम्। क्लीं-त्रिपुरेश्वरी नेत्रत्रयायवौषट् सौः त्रिपुरेश्वरी अस्त्रायफट्। ततो ध्यात्वा पुष्पाञ्जलिना देवितेजः समानीय यन्त्रे कल्पितमूर्तौ आवाह्नमुद्रया आवाह्य स्थापनमुद्रया सँस्थाप्यत्रिखण्डमुद्राम्वद्ध्वा। महापद्मवनान्तस्थे करुणामय्यविग्रहे ॥ सर्व्वभूतहिते मातरेह्येहि परमेश्वरि ॥ अमृतीकरणपरमीकरणमुद्राम्प्रदर्श्य मूलमुच्चार्य्य श्री महात्रिपुरसुन्दरी प्राणा इह सुप्रतिष्ठिता भवन्तु। मूलमुच्चार्य्य पाद्यन्नमः मूल-मर्घ्योनमः मूलङ्गन्धोनमः। मूलम्पुष्पन्नमः मूलन्धूपोनमः मूलन्दीपोनमः मूलन्नैवे-द्यन्नमः। लम्पृथिव्यात्मकङ्गन्ध समर्प्पयामिनमः हंआकाशात्मकम्पुष्पंसमर्प्ययामि-नमः यंव्वाय्वात्मकन्धूपंसमर्प्पयामिनमः रंवह्न्यात्मकन्दीपंसमर्प्पयामिनमः वं अंवात्मकममृतंसमर्प्पयामिनमः। इतिपञ्चोपचारान्निवेद्य। श्रीमहात्रिपुरसुन्दरि तवाज्ञाम्प्राप्य परिवारानर्च्चयामि। आज्ञाम्प्राप्य पूजयेत्। मध्ये ह्रीं श्रींकामेश्व-र्य्यैनमः भगमालिन्यैनमः क्लिन्नाय० भेरुण्डायै० विन्ध्यवासिन्यै० महाविद्येश्वर्य्यै० शिवदूत्यै० त्वरितायै० नित्यायै० नीलपताकायै० विजयायै० श्रियै० सर्व्वमङ्गलायै० ज्वालांशुमालिन्यै० ह्रीं श्रींविचित्रायैनम इतिसम्पूज्य। पूर्व्वद्वारे गङ्गणपतयेनमः। पश्चिमद्वारे वम्बटुकायनमः। उत्तरद्वारे ह्रींदुर्ग्गायैनमः। दक्षिणद्वारे क्षंक्षेत्रपाला-यनमः। वाह्यचतुरस्रस्य वाह्ये रेखायां पश्चिमादिद्वारचतुष्ये ह्रीं श्रीं अणिमादि-सिद्धिश्रीपादुकांपूजयामिनमः। लघिमासिद्धिम्पूजयामिनमः। महिमासिद्धिम्पूज-यामिनमः। ईशसिद्धिम्पूजयामिनमः। वाह्यादिकोणचतुष्टये वशित्वसिद्धिश्रीम्पूज-यामिनमः। प्राकाश्यसिद्धिश्रीम्पूजयामिनमः। भक्तिसिद्धि श्रीम्पूजयामिनमः। इच्छासिद्धिश्रीम्पूजयामिनमः। अधस्थात्प्राप्तिसिद्धिश्रीम्पूजयामिनमः। ऊर्द्ध्वं

करे। 'ह्रीं' कहकर उस अर्घ्यपात्र में पंचरत्न छोड़े। ग्लूं मन्त्र पढ़े। मत्स्य मुद्रा से आच्छादित एवं संरक्षण मुद्रा से संरक्षित, अवगुण्ठन मुद्रा से अव-गुण्ठित, अमृतीकरणमुद्रा से अमृतीकरण और प्रवोधनमुद्रा से प्रवोधित करे। मूलकामरण करे। 'अकुलस्था०' से जल को अभिमन्त्रित कर अपने ऊपर व पूजन सामग्री के ऊपर छिड़ककर पीठपूजा प्रारम्भ करे। 'ऐं ह्रीं नमः' कहकर कुश जल से पृथ्वी को शोधित कर त्रिपदी रखकर पूजा करे। 'ऐं आधार-शक्तये०' मन्त्र पढ़कर ताम्रपात्र के ऊपर श्री यन्त्र की स्थापना करे। आग्ने-यादि चारों कोणों की पूजा करे। तदनन्तर पूर्वादि चारों दिशाओं की पूजा करे। फिर अधर्मायनमः आदि मन्त्र पढ़कर पीठ पूजा करे। फिर अंग न्यासादि करे। फिर श्री विद्या का ध्यान करे पुष्पांजलि लेकर यन्त्र में कल्पित मूर्ति का आवाहन मुद्रा से आवाहन कर स्थापन मुद्रा से स्थापित करे। त्रिखण्ड मुद्रा बाँधकर प्राण प्रतिष्ठा करे। मूलमन्त्र से अर्घ्य गन्ध-धूप-दीप-नैवेद्य समर्पित करे। फिर महासुन्दरी से आज्ञा लेकर परिवार

सर्व्वकामसिद्धिम्पूजयामिनमः। मध्यं चतुरस्रस्य पश्चिमादिद्वारचतुष्टये। ह्रीं श्रीं आं ब्राह्मीनमः। ईंमाहेश्वर्य्यैनमः। उँकौमारीश्री पादुकाम्पूजयामिनमः। ऋंवैष्णवी श्री०। मध्यचतुरस्रस्य बाह्यादिकोणे ह्रीं श्रीं लॄंवाराहीश्री० ऐंइन्द्राणीश्री० औंचामुण्डाश्री० अः महालक्ष्मी श्री०। अभ्यन्तरचतुरस्रस्य पश्चिमादिद्वारचतुष्टये। त्रिखण्डाक्षमुद्राश्री० ह्रीं सर्व्वसङ्क्षोभिणीमुद्रा श्री० ह्रीं सर्व्वविद्राविणीमुद्रा श्री० क्लींसर्व्वाकर्ष्षिणीमुद्राश्री०। अभ्यन्तरचतुरस्रस्य वाह्यादिकोणचतुष्टये ल्कुंसर्व्वावेशकरीमुद्राश्री० सर्व्वोन्मादकरीमुद्राश्री० क्रौंमहाङ्कुशामुद्राश्रीपादु० ल्कुंखेचरीमुद्राश्री० ततस्त्रिवलये बीजमुद्राश्री० योनिमुद्राश्री० चार्व्वाकदर्श्शनायनमः। ततो हस्तेनार्ग्घ्यजलङ्गृहीत्वा। अत्र त्रैलोक्यमोहनचतुरस्रचक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एता ईशित्वाद्याः प्रकटयोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्व्वोपचारैस्सम्पूजितास्सन्तु इति मूलेनार्प्पयेत्। ततः षोडशदलेषु पश्चिमदलादारभ्य देव्या ⁀ प्रदक्षिणाक्रमेण पूजयेत्। ह्रीं श्रीं अंकामाकर्ष्षिणी नित्याकलाश्री० आंबुद्ध्याकर्ष्षिणी नित्याकलाश्री० इंअहङ्काराकर्ष्षिणी नित्याकला श्री० ईंशब्दाकर्ष्षिणी नित्याकलाश्री० उंरूपाकर्ष्षिणी नित्याकलाश्री० ऊँस्पर्शकर्ष्षिणी नित्याकलाश्री० ऋंरसाकर्ष्षिणी नित्याकलाश्री० ॠंगन्धाकर्ष्षिणी नित्याकलाश्री० लृंचिन्ताकर्ष्षिणी नित्याकलाश्री० लॄंधैर्य्याकर्ष्षिणी नित्याकला श्री एंस्मृत्याकर्ष्षिणी नित्याकलाश्री० ऐंनासाकर्ष्षिणी नित्याकलाश्री ओंवीजाकर्ष्षिणी नित्याकला श्री० अंअमृताकर्ष्षिणी नित्याकलाश्री० अः शरीराकर्ष्षिणी नित्याकलाश्री रेखायाम्बौद्धदर्श्शनायनमः। ततो हस्तेनार्ग्घ्यजलङ्गृहीत्वा। अत्र सर्व्वाशापरिपूरके षोडशदलचक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एता⁀कामाकर्ष्षिण्याद्या गुप्तयोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्व्वोपचारैः पूजितास्सन्तु। इतिमूलमन्त्रेण देव्यै निवेदयेत्। ततोऽष्टदलचक्रे पूर्व्वदलेषु ह्रीं

की पूजा करे। मध्य में ह्रीं श्रीं कामेश्वर्यै नमः इत्यादि मन्त्रों से, पूर्व द्वार में 'गंगणापतये नमः' मे, पश्चिम उत्तर दक्षिण द्वारों की पूजा करे। वाह्य चतुरस्र की वाहरी रेखा में पश्चिमादि द्वार चतुष्टयों की पूजा करे। उपरिलिखित क्रम से नीचे ऊपर मध्य आदि की पूजा कर वाह्य आभ्यन्तर चतुरस्र की पूजा करे। फिर षोडशदलों में पश्चिम दल से आरम्भ कर देवी की प्रदक्षिणाक्रम से पूजा करे। फिर हाथ में अर्घ्यजल लेकर समस्त आशाओं के परिपूरक षोडशदल चक्र में श्रीमहात्रिपुर सुन्दरी के साथ गुप्त योगिनी समुद्र सिद्धि सायुध सवाहन सपरिवार की सम्पूर्ण अर्चा करे मूलमन्त्र से पूजा देवी को समर्पित करे, फिर अष्टदल चक्र में पूर्व दलों में 'ह्रीं श्रीं कं खं गं०' इत्यादि मन्त्र पढ़े, पूजा करे और देवी को मूल मन्त्र से समर्पित करे। फिर सौभाग्यदायक चतुर्दशचक्र में भगवती की सपरिवार सायुध पूजा करे मूल मन्त्र से समर्पित करे। फिर बाह्य दशारचक्र में पश्चिम

श्रीं कँ खँ गँ घँ ङँ अनङ्गकुसुमादेवीश्री० चँ छँ जँ झँ ञँ अनङ्गमेखलादेवी श्री० टँ ठँ डँ ढँ णँ अनङ्गमदनादेवीश्री० तँ थँ दँ धँ नँ अनङ्गमदनातुरा-देवीश्री० पँ फँ बँ भँ मँ अनङ्गरेखादेवीश्री० यँ रँ लँ वँ अनङ्गवेगिनीदेवीश्री० शँ षँ सँ हँ अनङ्गकुशादेवीश्री० ळँ क्षं अनङ्गमालिनीदेवी श्रीपादुकाम्पूजयामिनमः। अत्र सङ्क्षोभकरेऽष्टदलचक्रे श्रीमहात्रिपुरसुन्दरी समधिष्ठिते एता अनङ्गकुसुमाद्या गुप्ततरा योगिन्यः समुद्रास्ससिद्धयः सायुधास्सवाहनास्सपरिवारास्सर्व्वोपचारैः पूजितास्सन्तु इत्यर्घ्यजलेन देव्यै समर्प्पयेत्। ह्रीं श्रींसर्व्वसङ्क्षोभिणीशक्ति श्री० सर्व्वद्राविणिशक्तिश्रीपादुकाम्पूजयामिनमः सर्व्वाकर्ष्षिणीशक्तिश्रीपादुकाम्पूजयामि-नमः सर्व्वाह्लादिनीशक्तिश्री० सर्व्वमोहिनीशक्तिश्री० सर्व्वस्तम्भिनीशक्तिश्री० सर्व्व-ज्जृम्भणीशक्तिश्री० सर्व्ववशङ्करीशक्तिश्री०सर्व्वरञ्जिनीशक्तिश्री० सर्व्वोन्मादिनी-शक्तिश्री०सर्व्वार्त्थसाधनीशक्तिश्री० सर्व्वाशापरिपूरणीशक्तिश्री० सर्व्वमन्त्रमयीशक्ति श्री० सर्व्वद्वन्द्वक्षयङ्करीशक्तिश्री० वहिः साङ्ख्यनैय्यायिकदर्शनेभ्योनमः। अत्र सौभाग्यदायके चतुर्द्दशचक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एतास्सङ्क्षोभिण्या-द्याश्शक्तयः सम्प्रदाययोगिन्यः समुद्रास्ससिद्धयः सायुधास्सवाहनास्सपरिवारास्स-र्व्वोपचारैस्सम्पूजितास्सन्तु। इत्यर्घ्यजलेन मूलन्देव्यै समर्प्प येत्॥ ततो बहिर्द्द-शारचक्रे पश्चिमादिदशान्तं पूजयेत्। ह्रीं श्रींसर्व्वसिद्धिप्रदादेवी श्री० सर्व्वसम्पदा-देवीश्री० सर्व्वप्रियङ्करीशङ्करीदेवीश्री० सर्व्वमङ्गलकारिणीदेवीश्री० सर्वं कामप्रदा-देवीश्री० सर्व्वदुःखविमोचनीदेवीश्री० सर्वाङ्गसुन्दरीदेवीश्री० सर्व्वमृत्युविना-शिनीदेवीश्री० सर्व्वदुःखविनाशिनी देवीश्री० सर्वसौभाग्यदायिनीदेवीश्री०। अत्र सर्व्वाशापरिपूरके चक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एतास्सर्व्वसिद्धिप्रदाद्यादेव्यः कुलकौलिनीयोगिन्यः समुद्रास्ससिद्धयस्सायुधास्सवाहनास्सपरिवारास्सर्व्वोपचा-रैस्सम्पूजितास्सन्तु। इत्यर्घ्यजलेन मूलेन देव्यै समर्प्पयेत्। ततोऽन्तर्द्दशारचक्राग्राद्द

से पूजा प्रारम्भ करे। फिर मूल मन्त्र से देवी को समर्ति करे। फिर अन्तर्दशार चक्राग्र से दक्षिण तक 'ह्रीं श्रीं सर्वज्ञा देवी श्री०' इत्यादि मन्त्र पढ़े। फिर मूल मन्त्र से देवी को पूजा अर्पित करे फिर अष्टारचक्र में चक्र से पश्चिमादि दक्षिण दिशा तक पूजा करे। 'ह्रीं श्रीं अं आं०' इत्यादि मन्त्र पढ़कर सर्वरोगहर अष्टारचक्र में श्रीं महात्रिपुरसुन्दरी देवी की पूजाकर अर्घ्यजल देवी को समर्पित करे। फिर अभ्यन्तर कोण त्रय में तीन बार पुष्पाञ्जलि दे। चक्र के मध्य में दक्षिण की ओर बायें, नीचे, दक्षिण आगे की पूजा मन्त्रों से करे। फिर त्रिकोण के मध्य में ईकार रूपाकाम कला का ध्यान करे। फिर ब्रह्म विष्णुरुद्र ईशान सदाशिव पंचप्रेतों व नवग्रहों का पूजन कर माला लेकर यथा शक्ति जप करे। जप अर्पितकर यथा शक्ति स्तोत्रों से स्तुति करे। प्रदक्षिणा

क्षिणान्तंय्यावत्पूजयेत् । ह्रीं श्रींसर्व्वज्ञादेवीश्री० सर्व्वशक्तिमयीदेवीश्री० सर्व्वैश्वर्य्यप्रदादेवीश्री० सर्व्वज्ञानमयीदेवीश्री० सर्व्वव्याधिविनाशिनीदेवीश्री सर्व्वाशापरिपूरणीदेवीश्री० सर्व्वपापहरादेवीश्री० सर्व्वानन्दमयीदेवीश्री० सर्व्वान्तकामरूपिणीदेवीश्री० सर्व्वेप्सितफलप्रदादेवीश्री० अत्र सर्व्वरक्षाकरे अन्तर्द्दशारचक्रे त्रिपुरमालिनी श्रीत्रिपुरसुन्दरीसमधिष्ठते एतास्सर्व्वज्ञाद्यानिर्भ्भययोगिन्यस्समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैस्सम्पूजिताः सन्तुः । इत्यर्ग्घ्यजलेनमूलेन देव्यै समर्पयेत् । ततोऽष्टारचक्रे चक्रात्पश्चिमादिदक्षिणान्तं यावत्पूजयेत् । ह्रीं श्रीं अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐं ओं औं अँ अः वशिनीवाग्देवताश्री० कँ खँ गँ घँ ङँ कामेश्वरीवाग्देवताश्री० चँ छँ जँ झँ ञँ मोदिनीवाग्देवताश्री० टँ ठँ डँ ढँ णँ विमलावाग्देवताश्री० तँ थँ दँ धँ नँ अव्ययावाग्देवताश्री० पँ फँ बँ भँ मँ जयिनीवाग्देवताश्री० यँ रँ लँ वँ सर्वेश्वरीवाग्देवताश्री० शँ षँ सँ हँ क्षँ कौलिनीवाग्देवताश्री० ॥ अत्र सर्व्वरोगहरे अष्टारचक्रे श्रीमहात्रिपुरसुन्दरींसमधिष्टिते एता वशिन्याद्या रहस्ययोगिन्यः समुद्राः ससिद्धयस्सायुधास्सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजितास्सन्तु । इत्यर्ग्घ्यजलेन मूलेन देव्यै समर्प्पयेत् । अभ्यन्तरकोणत्रये पुष्पाञ्जलिं व्वारत्रयन्दद्यात् । चक्रमध्ये दक्षिणे उत्तमबाणायनमः । वामे मोहधनुषेनमः । तदधः कर्क्कशायनमः । दक्षिणे स्तम्भाङ्कुशायनमः । अग्रे क्लीं कामेश्वर्य्यैनमः । आंचक्रिण्यैनमः ऐंभगशालिन्यैनमः । मूलेन श्रीमहात्रिपुरसुन्दर्य्यैनमः । ततः त्रिकोणमध्ये कामकलाभीकाररूपां ध्यायेत् । ततो ब्रह्मविष्णुरुद्रेशानसदाशिवेभ्यः पञ्जप्रेतेभ्योनमः नवग्रहेभ्योनम इत्यभ्यर्च्चर्य मालाङ्गृहीत्वा यथाशक्ति जपेत् । ततः गुह्यातिगुह्यगोप्त्री त्वङ्गृहाणास्मत्कृतञ्जपम् । सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ इति जलेन देव्या वामहस्ते समर्प्पयेत् । जपन्देव्या गृहीतन्तेजोमयँ व्विभाव्य । विधिहीनङ्क्रियाहीनम्भक्तिहीनञ्च यद्भवेत् ॥ पूर्ण्णं भवतु तत्सर्व्वं त्वत्प्रसादात्त्रिलोचने ॥ इति यथाशक्ति स्तुत्वा प्रदक्षिणन्त्रि प्रणम्य कृतार्त्थमात्मानम्भावयेत् । योनिमुद्राम्प्रदर्श्शयेत् । संहारमुद्रया विसर्ज्जयेत् । निर्माल्यङ्गृहीत्वा ऐशान्यान्त्रिकोणमण्डलङ्कृत्वा ऐंचँचण्डेश्वर्य्यैनमः इत्यभ्यर्च्चर्य्य निर्म्माल्यं शिरसि धृत्वा यथासुखं व्विहरेत् । श्रीविद्याज्ञानमात्रेण सर्व्वसिद्धिः प्रजायते ॥ अतो विद्या प्रदातव्या नाभक्ताय कदाचन । इति पूजापद्धतिः ॥

करे और तीन बार प्रणाम करे। योनि मुद्रा का प्रदर्शन कर संहार मुद्रा से विसर्जन करे। निर्माल्य को लेकर ऐशान्य दिशा में त्रिकोण मण्डल बनाकर 'ऐं चं चण्डेश्वर्यैनमः' कहकर निर्माल्य को अपने मस्तक में रखकर यथा सुख विहार करे। श्री विद्या के ज्ञान मात्र से समस्त सिद्धियाँ प्राप्त होती हैं, इसलिये यह विद्या अभक्त को कभी न बतानी चाहिए। इति पूजा पद्धतिः ॥

पाँचवाँ अध्याय

श्री श्रीयन्त्र का बृहत् पूजा विधान

श्री विद्या (श्री यन्त्र) के पूजन का विस्तृत विधान 'मन्त्रमहोदधि' में मिलता है। साधकों के कल्याणार्थ हम उसे भी प्रस्तुत करते हैं—

तारं मायां च कमलामादौ बीजत्रयं पठेत्।
ब्रह्मझिण्टीशगोविन्दधरा मायेति चादिमम् ॥१॥
आकाशभृगुचक्र्यभ्रमांसमायाद्वितीयकम् ।
हंसधात्रीक्षमामाया तृतीयं बीजमीरितम् ॥२॥
वाक्काभशक्तिसंज्ञं तु क्रमाद्बीजत्रयं भवेत्।
इयं षडर्णा श्रीमायाकामवाक्छक्तिसम्पुटा ॥३॥
अनेक पुण्यसम्प्राप्या श्रीविद्याषोडशाक्षरी।

षोडशी मन्त्र का उद्धार—(कूटत्रय के) आदि में तार (ॐ) माया (ह्रीं) एवं कमला (श्रीं) ये तीनों बीज बोलने चाहिए। ब्रह्म (क) झिंटीश (ए) गोविन्द (ई) धरा (ल) एवं माया (ह्रीं) अर्थात् 'कएईलह्रीं' यह प्रथम कूट है। आकाश (ह) भृगु (स) चक्री (क) अभ्र (ह) मांस (ल) तथा माया (ह्रीं) अर्थात् 'हसकहलह्रीं'—यह द्वितीय कूट है। हंस (स) धाता (क) क्षमा (ल) एवं माया (ह्रीं) अर्थात् 'सकलह्रीं' यह तृतीय कूट है। इन तीनों में से प्रथम वाग्बीज, द्वितीय कामबीज तथा तृतीय शक्ति बीज कहलाता है।

इस षोडशाक्षरा (ॐ ह्रीं श्रींकएईलह्रीं हसकहलह्रीं सकलह्रीं) विद्या को श्रीमाया, काम, वाग्, एवं शक्ति—इन पाँचों बीजों से सम्पुटित करने पर अनेक पुण्यों से प्राप्त होने वाली षोडशाक्षरी श्रीविद्या बनती है।

मूल षोडशी मन्त्र—श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईल ह्रीं हसकहल ह्रीं सकल ह्रीं सौः ऐं क्लीं ह्रीं श्रीं।

मुनिः स्याद्दक्षिणामूर्तिः पंक्तिश्छन्दः समीरितम् ॥४॥
देवताजगतामादिः श्रीमत्त्रिपुरसुन्दरी।
बीजमैं भृगुरौः शक्तिः कामबीजं तु कीलकम् ॥५॥

मूर्द्धास्यहृद्गुह्यपादे नाभौ भुन्यादिकान्न्यसेत् ।

टिप्पणी=विनियोग—अस्य श्री त्रिपुरसुन्दरी मन्त्रस्य दक्षिणामूर्तिर्ऋषिः पंक्तिश्छन्दः श्रीमत्त्रिपुरसुन्दरी देवता ऐं बीजं सौः शक्तिः क्लीं कीलकं ममाभीष्ट सिद्धये जपे विनियोगः ।

ऋष्यादिन्यास—

दक्षिणामूर्तये नमः—मूर्ध्नि ।
पंक्तिच्छन्दसे नमः—मुखे ।
त्रिपुरसुन्दर्य्यै देवतायै नमः—हृदि ।
ऐं बीजाय नमः—गुह्ये ।
सौः शक्तये नमः—पादयोः ।
क्लीं कीलकाय नमः—नाभौ ।

न्यासान्सर्व्वान्प्रकुर्वीत मायाश्री बीजपूर्वकान् ॥६॥
मध्यानामाकनिष्ठासु ज्येष्ठयोस्तर्जनीद्वयो. ।
तले पृष्ठे च करियोर्विन्यसेद्द्विष्क्रमादिमान् ॥७॥
श्री कण्ठानन्तसौवर्णान् बिन्दु सर्गसमन्वितान् ।
नमोन्तान्करशुद्ध्याख्यो न्यासोयं परिकीर्तितः ॥८॥

करशुद्धिन्यास—(इस महाविद्या के) सभी न्यास प्रारम्भ में माया एवं श्रीबीज लगाकर करने चाहिये । बिन्दुसहित श्रीकण्ठ एवं अनन्त (अं आ) तथा विसर्ग सहित 'सौ' (सौः) इन वर्णों के अन्त में 'नमः' लगाकर क्रम से मध्यमा, अनामिका एवं कनिष्ठिका तथा फिर अंगुष्ठ तर्जनी एवं करतल के पृष्ठ में न्यास करना चाहिये । यह कर शुद्धि न्यास कहलाता है

करशुद्धिन्यास—

ह्रीं श्रीं अं मध्यमाभ्यां नमः ।
ह्रीं श्रीं आं अनामिकाभ्यां नमः ।
ह्रीं श्रीं सौः कनिष्ठिकाभ्यां नमः ।
ह्रीं श्रीं अं अंगुष्ठाभ्यां नमः ।
ह्रीं श्रीं आं तर्जनीभ्यां नमः ।
ह्रीं श्रीं सौः करतलकरपृष्ठाभ्यां नमः ।

आसनः—माया (ह्रीं) काम (क्लीं) एवं शक्ति (सौः) को प्रथम आसन के साथ लगाकर, वियदारूढ वाग् (हैं) काम (क्लीं) एवं शक्ति (सौः) को द्वितीय आसन के प्रारम्भ में लगाकर, इन्हीं बीजों को तृतीय आसन के प्रारम्भ में लगाकर तथा माया (ह्रीं) काम (क्लीं) एवं भग तथा 'बिन्दु सहित फान्त मांस (ब्लें) को चतुर्थ आसन के प्रारम्भ में लगाकर करना चाहिए ।

आसन न्यास—

ह्रीं श्रीं ह्रीं क्लीं सौः देव्यासनाय नमः—पादयोः।
ह्रीं श्रीं हैं क्लीं सौः चक्रासनाय नमः—जंघयोः।
ह्रीं श्रीं हैं क्लीं सौः सर्वमन्त्रासनाय नमः—जान्वोः।
ह्रीं श्रीं हैं क्लीं ब्लें साध्यसिद्धासनाय नमः—लिङ्गे।
ततः षडंगं कुर्वीत पञ्चभिस्त्रिभिरेकतः।
एकेनैकेपंचार्णैर्मन्त्रस्य क्रमतः सुधीः ॥९॥

षडङ्गन्यास—

श्रीं ह्रीं क्लीं ऐं सौः हृदयाय नमः।
ॐ ह्रीं श्रीं शिरसे स्वाहा।
कएईल ह्रीं शिखायै वषट्।
हसकहल ह्रीं कवचाय हुम्।
ॐ कचजिताम्बुदायै नमः
ॐ कटाक्षस्यन्दिकरुणायै नमः
ॐ कपालिप्राणनायिकायै नमः
ॐ कारुण्यविग्रहायै नमः
ॐ कान्तायै नमः
ॐ कान्तिधूतजपावल्यै नमः
ॐ कलालापायै नमः
ॐ कम्बुककण्ठ्यै नमः
ॐ करनिर्जितपल्लवायै नमः
ॐ कल्पवल्लीसमभुजायै नमः
ॐ कस्तूरीतिलकाञ्चितायै नमः
ॐ हकारार्थायै नमः

ॐ सर्वानवद्यायै नमः
,, सर्वाङ्गसुन्दर्यै नमः
,, सर्वसाक्षिण्यै नमः
,, सर्वात्मिकायै नमः
,, सर्वसौख्यदात्र्यै नमः
,, सर्वविमोहिन्यै नमः
,, सर्वाधारायै नमः
,, सर्वगतायै नमः
,, सर्वाविगुणवर्जितायै नमः
,, सर्वारुणायै नमः
,, सर्वमात्रे नमः
,, सर्वभूषणभूषितायै नमः
,, ककारार्थायै नमः
,, हानोपादाननिर्मुक्तायै नमः
,, हर्षिण्यै नमः
,, हरिसोदर्यै नमः
,, हाहाहूहूमुखस्तुत्यायै नमः
,, हानिवृद्धिविवर्जितायै नमः
,, हय्यङ्गवीनहृदयायै नमः
,, हरिगोपारुणांशुकायै नमः
,, लकाराख्यायै नमः
,, लतापूज्यायै नमः
,, लयस्थित्युद्भवेश्वर्यै नमः
,, लास्यदर्शनसन्तुष्टायै नमः
,, लाभालाभविवर्जितायै नमः
,, लंघ्येतराज्ञायै नमः
,, लघुसिद्धिदायै नमः
,, लाक्षारससवर्णाभायै नमः
,, लक्ष्मणाग्रजपूजितायै नमः
,, लभ्येतरायै नमः
,, लब्धभक्तिसुलभायै नमः
,, लाङ्गलायुधायै नमः

ॐ हंसगत्यै नमः
,, हाटकाभरणोज्ज्वलायै नमः
,, हारहारिकुचभोगायै नमः
,, हाकिन्यै नमः
,, हल्यवर्जितायै नमः
,, हरित्पतिसमाराध्यायै नमः
,, हठात्कारहतासुरायै नमः
,, हर्षप्रदायै नमः
,, हविर्भोक्त्र्यै नमः
,, हार्दसन्तमसापहायै नमः
,, हल्लीसलास्य सन्तुष्टायै नमः
,, हंसमन्त्रार्थरूपिण्यै नमः
,, ह्रींकाराम्भोदचञ्चलायै नमः
,, ह्रींकारकन्दांकुरिकायै नमः
,, ह्रींकारैकपरायणायै नमः
,, ह्रींकारदीर्घिकाहंस्यै नमः
,, ह्रींकारोद्यानकेकिन्यै नमः
,, ह्रींकारारण्यहरिण्यै नमः
,, ह्रींकारावालवल्लयै नमः
,, ह्रींकारपञ्जरशुक्यै नमः
,, ह्रींकाराङ्गणदीपिकायै नमः
,, ह्रींङ्कारकन्दरासिंह्यै नमः
,, ह्रींकाराम्भोजभृङ्गिकायै नमः
,, ह्रींकारसुमनोभृङ्गिकायै नमः
,, ह्रींकारतरुमञ्जर्यै नमः
,, सकाराख्यायै नमः
,, समरसायै नमः
,, सकलागमसंस्तुतायै नमः
,, सर्ववेदान्ततात्पर्यभूम्यै नमः
,, सदसदाश्रयायै नमः
,, सकलायै नमः
,, सच्चिदानन्दायै नमः

ॐ लग्नचामरहस्तश्रीशारदापरिवीजितायै नमः
,, लज्जापदसमाराध्यायै नमः
,, लम्पटायै नमः
,, लकुलेश्वर्यै नमः
,, लब्धमानायै नमः
,, लब्धरसायै नमः
,, लब्धसम्पत्समुन्नत्यै नमः
,, ह्रींकारिण्यै नमः
,, ह्रींकाराद्यायै नमः
,, ह्रींमध्यायै नमः
,, ह्रींशिखामणये नमः
,, ह्रींकारकुण्डाग्निशिखायै नमः
,, ह्रींकारशशिचन्द्रिकायै नमः
,, ह्रींकारभास्करुच्यै नमः ।

ॐ साध्व्यै नमः
,, सद्गतिदायिन्यै नमः
,, सनकादिमुनिध्येयायै नमः
,, सदाशिवकुटुम्बिन्यै नमः
,, सकलाधिष्ठानरूपायै नमः
,, सत्यरूपायै नमः
,, समाकृत्यै नमः
,, सर्वप्रपञ्चनिर्मात्र्यै नमः
,, समानाधिकवर्जितायै नमः
,, सर्वोत्तुंगायै नमः
,, सङ्गहीनायै नमः
,, सगुणायै नमः
,, सकलेष्टदायै नमः

अथ षोडषी कल्याणी स्तोत्रम्

कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मी स्वयंव्वरणमङ्गलदीपिकाभिः ॥ सेवाभिरम्ब तव पादसरोजमूले नाकारि किम्मनसि भक्तिमताञ्जनानाम् ॥१॥ एतावदेव जननि स्पृहणीयमास्ते त्वद्वन्दनेषु सलिलस्थसरोजनेत्रे । सान्निध्यमुद्यदरुणाम्बुजसोदरस्य त्वद्विग्रहस्य सुधया परया प्लुतस्य ॥२॥ ईषत्प्रभावकलुषा ऽऽ कतिनाम सन्ति ब्रह्मादय ऽऽ प्रतिदिनम्प्रलयाभिभूताः ॥ एकस्य एव जननि स्थिरसिद्धिरास्ते य ऽऽ पादयोस्तव सकृत्प्रणतिङ्करोति ॥३॥ लब्ध्वा सकृत्त्रिपुरसुन्दरि तावकीनङ्कारुण्यकन्दलतिकान्तिभरङ्कटाक्षम् ॥ कन्दर्प्पभावसुभगास्त्वयि भक्तिभाजः सम्मोहयन्ति तरुणीम्भुवनत्रयेऽपि ॥४॥ ह्रींकारमेव तव नाम गृणन्ति ये वा मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे ॥ त्वत्संस्मृतौ यमभटाभिभवं व्विहाय दिव्यति नन्दनवने सह लोकपालैः ॥५॥ हन्तु ऽऽ पुरामधिगलत्परिपूर्णमान ऽऽ क्रूर ऽऽ कथन्न भविता गरलस्य वेगः ॥ नाश्वासनाय यदि मातरिदन्तवार्द्धदेहस्य शश्वदमृताप्लुतशीतलस्य ॥६॥ सर्व्वज्ञतां सदसि वाक्पटुताम्प्रसूते देवि त्वदङ्घ्रिसरसीरुहयो ऽऽ प्रणामः ॥ किञ्च स्फुरन्मुकटमुज्ज्वलमातपत्रन्द्वे चामरे च महतीं व्वसुधान्दधाति ॥७॥ कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः ॥ आलोकय त्रिपुरसुन्दरि मामनाथन्त्वय्येवभक्तिभरितन्त्वयि बद्धदृष्टिम् ॥८॥ हृन्ने तरेष्वपि निधाय मनांसि चान्ये भक्तिं व्वहन्ति किल सापरदैवतेषु ॥ त्वामेव

देवि मनसाऽहमनुस्मरामि त्वामेव नौमि शरणञ्जननि त्वमेव ।।९।। लक्षेषु सत्स्वपि तवाक्षिविलोकनानामालोकय त्रिपुरसुन्दरि माङ्कथञ्चित् ।। नूनम्मया च सदृशङ्करुणैकपात्रञ्जातो जनिष्यति जनो न च जायते वा ।।१०।। ह्रींह्रींमिति प्रतिदिनञ्जपतान्तवाख्याङ्किन्नाम दुर्ल्लभमिह त्रिपुराभिधाने ।। मालाकिरीटमदवारणमाननीयांस्तान्सेवते मधुमती स्वमेव लक्ष्मीः ।।११।। सम्पत्कराणि सकलेन्द्रियनन्दनानि साम्राज्यदानकुशलानि सरोरुहाक्षि ।। त्वद्वन्दनानि दुरितोद्धरणोद्यतानि मामेव मातरनिशङ्कलयन्तु नान्यम् ।।१२।। कल्पोपसंहरणकल्पितताण्डवस्य देवस्य खण्डपरशो ऽ परभैरवस्य ।। पाशाङ्कुशैक्षवशरासनपुष्पबाणाः सा साक्षिणी विजयते तव मूर्त्तिरेका ।।१३।। लग्नं सदा भवतु मातरिदन्त्वदीयन्तेज ऽ परम्बहुलकुङ्कमपङ्कशोणम् ।। भास्वत्किरीटममृतांशुकलावतंसं रूपं त्रिकोण मुदितम्परमामृताक्तम् ।।१४।। ह्रीङ्कारत्रयसम्पुटेन महता मन्त्रेण सन्दीपितं, स्तोत्रं य्य ऽ प्रतिवासरस्तव पुरो मातर्ज्जपेन्मन्त्रवित् । तस्य क्षोणिभुजो भजन्ति वशगा लक्ष्मीश्चिरं स्थायिनी, वाणी निर्म्मलसूक्ति भावभरिता जार्गति दीर्घ्घं य्यशः ।।१५।। इतिब्रह्मविरचितं षोडशीकल्याणीस्त्रोत्रं समाप्तम् ।।

अथ श्री षोडशी विद्या कवचम्

देव्युवाच ।। देवदेव महादेव भक्तानाम्प्रीतिदायक ।। सुचिन्तयन्महादेव्याः कवचङ्कथयस्व मे ।।१।। श्री महादेव उवाच ।। शृणु देवि प्रवक्ष्यामि कवचन्देवदुर्ल्लभम् ।। अप्रकाश्यम्परङ्गुह्यं साधकाभीष्टसिद्धिदम् ।।२।। कवचस्य ऋषिर्द्देवि दक्षिणामूर्तिरव्ययः ।। छन्द ऽ पङ्क्तिः समुदिदष्टन्देवी त्रिपुरसुन्दरी ।।३।। धर्म्मार्त्थकाममोक्षाणाँ व्विनियोगस्तु साधने ।। वाग्भवङ्कामबीजञ्च शक्तिबीजं सुरेश्वरि ।।४।। वाग्भवम्पातु शीर्षे माङ्कामबीजन्तथा हृदि ।। शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः ।।५।। एँल्क्लींसौंवदने पातु बाला मां सर्व्वसिद्धये ।। हसौः सकलह्रीं पातु भैरवी कण्ठदेशतः ।।६।। सुन्दरी नाभिदेशे च शीर्षे कामकला सदा ।। भ्रूनासयोरन्तराले महात्रिपुरसुन्दरी ।।७।। ललाटे सुभगा पातु भगामाङ्कण्ठदेशतः ।। भगोदया तु हृदये उदरे भगसर्पिणी ।।८।। भगमाला नाभिदेशे लिङ्गे पातु मनोभवा ।। गुह्ये पातु महादेवी राजराजेश्वरी शिवा ।।९।। चैतन्यरूपिणी पातु पादयोर्ज्जगदम्बिका ।। नारायणी सर्व्वगात्रे सर्व्वकाये शुभङ्करी ।।१०।। ब्रह्माणी पातु माम्पूर्व्वे दक्षिणे वैष्णवी तथा ।। पश्चिमे पातु वाराही उत्तरे च महेश्वरी ।।११।। आग्नेय्याम्पातु कौमारी महालक्ष्मीस्तु नैर्ऋते ।। वायव्याम्पातु चामुण्डा इन्द्राणी पातु ईशके ।।१२।। जले पातु महामाया पृथिव्यां सर्व्वमङ्गला ।। आकाशे पातु वरदा सर्व्वत्रिभुवनेश्वरी ।।१३।। इदन्तु कवचन्देव्या देवानामपि दुर्ल्लभम् ।। य ऽ पठेत्प्रातरुत्थाय शुचि ऽ प्रयतमानसः ।।१४।। नाधयो व्याध-

यस्तस्य न भयञ्च क्वचिद्भवेत् ।। न तु मारीभयन्तस्य पातकानाम्भयन्तथा ।।१५।। न दारिद्र्यवशङ्गच्छेत्तिष्ठेन्मृत्युवशे न च ।। गच्छेत्स्थिर पुरन्देवि सत्य सत्यँ व्वदाम्यहम् ।।१६।। इदङ्कवचमज्ञात्वा श्रीविद्याँय्यो जपेत्प्रिये स नाप्नोति फलन्तस्य प्राप्नुयाच्छस्त्रघातनम् ।।१७।। इति सिद्धयामले श्रीषोडशीविद्याकवचं समाप्तम् ।।

अथ षोडशी हृदयम्

कैलासे करुणाक्रान्ता परोपकृतिमानसा ।। पप्रच्छ करुणासिन्धुं सुप्रसन्नम्महेश्वरम् ।।१।। श्री पार्व्वत्युवाच ।। आगामिनि कलौ ब्रह्मन् धर्म्मकर्म्मविवर्ज्जिताः ।। भविष्यन्ति जनास्तेषाङ्कथं श्रेयो भविष्यति ।।२।। श्रीशिवउवाच ।। शृणु देवि प्रवक्ष्यामि तव स्नेहान्महेश्वरि ।। दुर्लभन्त्रिषु लोकेषु सुन्दरीहृदयस्तवम् ।।३।। ये नरा दुःखसन्तप्ता दारिद्र्यहतमानसाः ।। अस्यैव पाठमात्रेण तेषां श्रेयो भविष्यति ।।४।। ओमस्य श्रीमहाषोडशीहृदयस्तोत्रमन्त्रस्य आनन्दभैरवऋषिर्देवीगायत्रीछन्दः श्रीमहात्रिसुन्दरीदेवता ऐंबीजं सौः शक्तिः क्लींकीलकं धर्म्मार्त्थकाममोक्षार्त्थे विनियोगः ।। आनन्दभैरवऋषयेनमश्शिरसि ।। देवीगायत्रीछन्दसेनमः मुखे ।। श्रीमहात्रिपुरसुन्दरीदेवतायै नमः हृदये ।। ऐंबीजाय नमः नाभौ । सौः शक्तये नमः स्वाधिष्ठाने ।। क्लींकीलकाय नमः मूलाधारे । धर्म्मार्त्थकाममोक्षार्त्थे विनियोगः पादयोः ।। अथकराङ्गन्यासौ ।। ऐं ह्रीं क्लीं अङ्गुष्ठाभ्यान्नामः ।। क्लीं श्रीं सौः ऐं तर्ज्जनीभ्यांस्वाहा । सौः ॐ ह्रीं श्रीं मध्यमाभ्याँव्वषट् । ऐंकएईलह्रीं हसकहलह्रीं अनामिकाभ्यांहूम् । क्लीं सकलकनिष्ठाभ्याँव्वौषट् । सौः सौः ऐं क्लीं ह्रीं श्रीं करतलकरपृष्ठाभ्याम्फट् ।। एवमङ्गन्यासः ।। ध्यानम् । बालव्यक्तविभाकरामितनिभाम्भव्यप्रदाम्भारतीभीषत्फुल्लमुखाम्बुजस्मितकरैराशाभवान्धापहाम् ।। पाशँ साभयमङ्कुशञ्च वरदं सम्बिभ्रतीम्भूतिदां भ्राजन्तीञ्चतुरम्बुजाकृतिकरैर्भक्त्या भजे षोडशीम् ।।५।। सुन्दरी सकलकल्मषापहा कोटिकञ्जप्रियकाम्यकान्तिका ।। कोटिकल्पकृतपुण्यकर्म्मणा पूजनीयपदपुण्यपुष्करा ।।६।। शर्व्वरीशसमसुन्दरानना श्रीशशक्तिसुकृताश्रयश्रिता ।। सज्जनानुशरणीयसत्पदा सङ्कटे सुरगणैः सुवन्दिता ।।७।। या सुरासुररणे जवान्विता आजघान जगदम्बिकाऽजिता ।। ताम्भजामि जगताञ्जनिञ्जयाँ य्युद्धयुक्तदितिजान्सुदुर्ज्जयान् ।।८।। योगिनां हृदयसङ्गतां शिवाँ योगयुक्तमनसाँ य्यतात्मनाम् ।। जाग्रतीञ्जगति यत्नतो द्विजा याञ्जपन्ति हृदि ताम्भजाम्यहम् ।।९।। कल्पकास्तु कलयन्ति कलिकाँ य्यत्कला कलिजनोपकारिका ।। कौलिकालिकलिताङ्घ्रिकञ्जकान्ताम्भजामि कलिकल्मषापहाम् ।।१०।। बालार्क्कानन्तशोर्चिर्न्निजतनुकिरणैर्द्दीपयन्ती दिगन्तान् दीप्तैर्देदीप्यमानान्दनुजदलवनानल्पदावानलाभाम् ।। दान्तोदन्तोग्रचित्तान्दलितदिति

सुतान्दर्शनीयान्दुरन्तान्देवीन्दीनादर्द्रचित्तां हृदि मुदितमनाः षोडशीं संस्मरामि ॥११॥ धीरान्धन्यान्धरित्रीं धवविधृतशिरोधूतधूल्यब्जपादान्धृष्टान्धाराधराधोविनिधृतचपलाचारुचन्दत्प्रभाभाम् ॥ धर्म्मान्धूतोपहारान्धरणिसुरधवोद्धारिणी ध्येयरूपान्धीमद्धन्यातिधन्यान्धनदधनवृतां सुन्दरीञ्चिन्तयामि ॥१२॥ जयतु-जयतु जल्पा योगिनी योगयुक्ता जयतु-जयतु सौम्या सुन्दरी सुन्दरास्या ॥ जयतु जयतु पद्मा पद्मिनी केशवस्य जयतु जयतु काली कालिनी कालकान्ता ॥१३॥ जयतु जयतु खर्व्वा षोडशी वेदहस्ता जयतु जयतु धात्री धर्म्मिणी धातृशांतिः । जयतु जयतु वाणी ब्राह्मणा ब्रह्मवन्द्या जयतु जयतु दुर्गा दारिणी देवशत्रोः ॥१४॥ देवि त्वं सृष्टिकाले कमलभवभृता राजसी रक्तरूपा, रक्षाकाले त्वमम्बा हरिहृदयधृता सात्त्विकी श्वेतरूपा ॥ भूरिक्रोधा भवान्ते भवभवनगता तामसी कृष्णरूपा, एताश्चान्यास्त्वमेव क्षितिमनुजमता सुन्दरी केवलाद्या ॥१५॥ सुमलसुमनमेतद्देवि गोप्यङ्गणज्ञे ग्रहणमननयौग्यं षोडशीयङ्खलघ्नम् ॥ सुरतरुसमशोलं सम्प्रदम्पाठकानाम्प्रभवति हृदयाख्यं स्तोत्रमत्यन्तमान्यम् ॥१६॥ इदं त्रिपुरसुन्दर्य्याः षोडश्याऽ परमाद्भुतम् ॥ यः श्रृणोति नरः स्तोत्रं स सदा सुखमश्नुते ॥१७॥ न शूद्राय प्रदातव्यं शठाय समलात्मने ॥ देयन्दान्ताय भक्ताय ब्राह्मणाय विशेषतः ॥१८॥ इति श्रीत्रिपुरसुन्दरीतन्त्रे षोडशीहृदयस्तोत्रं समाप्तम् ॥

अथोपनिषत्

ॐ परमकारणभूता शक्तिऽ केन नवचक्ररूपो देहः नवचक्रशक्तिमयं श्रीचक्रँ व्वाराही पितृरूपा कुरुकुल्लाचीलदेवता मातापुरुषार्थाः सागराः देहो नवरत्ने द्वीपः आधारनवकमुद्राः शक्तयः त्वगादिसप्तधातुभिरनेकैः संयुक्ताः सङ्कल्पाऽ कल्पतरवः तेजऽ कल्पकोद्यानं रसनया भासमाना मधुराम्लतिक्तकटुकषायलवणरसाः षड्रसाऽ क्रियाशक्तिपीठङ्कुण्डलिनीज्ञानशक्तिः अहम् इच्छाशक्तिर्म्महात्रिपुरसुन्दरी ज्ञाता होता ज्ञानमर्घ्यं ज्ञेयं हविः ज्ञातृज्ञानज्ञेयानमो भेदभावनं श्रीचक्रपूजनन्नियतिसहितश्रृंङ्गारादयो नव रसा अणिमादयऽ कामक्रोधलोभमोहमदमात्सर्य्यपुण्यपापमया ब्राह्म्याद्यष्टशक्तयः आधारं नवकमुद्राशक्तयः पृथ्व्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिजह्वाघ्राणवाक्पाणिपादपायूपस्थाविकाराः षोडशशक्तयः वचनादानगमनविसर्गानन्दादानोपादानोपेक्षा बुद्धयोऽनङ्गकुसुमादिशक्तयोष्टौ अलम्बुषाकुहूविश्वोदरीवरुणाहस्तिजिह्वायशस्विनी गान्धारीपूषासरस्वतीइडापिङ्गलासुषुम्ना चेति चतुर्द्दशनाड्यः सर्व्वसङ्क्षोभिण्यादिचतुर्द्दशार देवताऽप्राणापानव्यानोदानसमाननागकूर्म्मकृकलदेवदत्तधनञ्जया दश वायवः सर्व्वसिद्धिप्रदादिबहिर्द्दशारदेवताः एतद्वायुदशकं ससर्गोपाधिभेदेन रेचकपूरकपोषकदाहकाप्लावकामृतमिति प्राणसख्यत्वेन पञ्चविधोऽस्ति जाठराग्निर्म्मनुष्याणाम्मोहको भक्ष्य-

भोज्यलेह्यचोष्यात्मकञ्चतुर्व्विधमन्नम्पाचयति ॥ तदाकाशवान् सकलाः सर्व्वज्ञत्वाद्यन्तर्दशारदेवताः शीतोष्णसुखदुःखेच्छासत्त्वरजस्तमोगुणादिवशिन्यादिशक्तयोऽष्टा शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पञ्चपुष्पवाणाः मनेक्षुधनुर्व्वल्यो वाणो राग पाशो द्वेषोऽङ्कुशोऽव्यक्तमहत्तत्त्वाहङ्कारकामेश्वरी—वज्रेश्वरीभगमालिन्योऽन्तस्त्रिकोणाग्रदेवताः पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनपञ्चदशनित्या शुद्धानुरूपाधिदेवता निरुपाधिसार्व्वदेवकामेश्वरी सदानन्दपूर्णाः स्वात्म्यैक्यरूपललिता कामेश्वरी सदानन्दघनपूर्णाः स्वात्म्यैक्यरूपा देवता ललितामिति साहित्यकरणं सत्त्वं कर्त्तव्यमाकर्त्तव्यमिति भावनामुक्ता उपचारा अहन्त्वमस्ति नास्ति कर्त्तव्याकर्त्तव्यमुपासितव्यानुपासितव्यमिति विकल्पनामनोविलापनं होमः वाह्याभ्यन्तरकरणानां रूपग्रहणयोग्यतास्तीत्यावाहनम् तस्य बाह्याभ्यन्तरकरणानामेकरूपविषयग्रहणमासनम् रक्तशुक्लपदैकीकरणम्पाद्यम् उज्ज्वलदामोदानन्दासानन्दमर्घ्यम् स्वच्छास्वतः शक्तिरित्याचमनम् चिच्चन्द्रमयीस्मरणं स्नानम् चिदग्निस्वरूपपरमानन्द शक्ति स्मरणं व्वस्त्रम् प्रत्येकं सप्तविंशतिधा भिन्नत्वेन इच्छाक्रियात्मकब्रह्मग्रन्थिमयी सतन्तुब्रह्मनाडीब्रह्मसूत्रम् सव्यातिरिक्तवस्त्रसङ्गरहितस्मरणं व्विभूषणम् स्वच्छन्दपरिपूर्णस्मरणङ्गन्धः समस्तविषयाणाम्मनः स्थैर्य्येणानुसन्धानङ्कुसुमन्तेषामेव सर्वदा स्वीकरणन्धूपः पवनाच्छिन्नोर्द्ध्वज्वला सच्चिदाह्लादाकाशदेहो दीपः समस्तयातायातिवर्ज्जनन्नैवेद्यम् अवस्थात्रयैकीकरणन्ताम्बूलम् मूलाधारादाब्रह्मरन्ध्रपर्य्यन्तम्ब्रह्मरन्ध्रादामूलाधारपर्य्यन्तङ्गतागतरूपेण प्रादक्षिण्यन्तुरीयावस्थानं संस्कार देहशून्यप्रमादितावतिमज्जनम्बलिहरणं सत्त्वमस्ति कर्त्तव्यमकर्त्तव्यमौदासीन्यमात्मविलापनं होमः भावनाविषयाणामभेद भावना तर्प्पणम् स्वयन्तत्पादुकानिमज्जनम्परिपूर्णध्यानम् एवम्मूर्त्तित्रयभावनया युक्तो मुक्तो भवति तस्य देवतात्मैक्यसिद्धिः चितिकार्य्याण्यप्रयत्नेन सिद्ध्यन्ति स एव शिवयोगीति कथ्यते ॥ इति षोडश्युपनिषत् समाप्ता ॥

अथ शतनाम्

भृगुरुवाच ॥ चतुर्व्वक्त्र जगन्नाथ स्तोत्रं व्वद मयि प्रभो ॥ यस्यानुष्ठानमात्रेण नरो भक्तिमवाप्नुयात् ॥१॥ ब्रह्मोवाच ॥ सहस्रनाम्नामाकृष्य नाम्नामष्टोत्तरं शतम् ॥ गुह्याद्गुह्यतरङ्गुह्यं सुन्दर्य्याः परिकीर्तितम् ॥२॥ ओमस्य श्रीषोडश्यष्टोत्तर शतनामस्तोत्रस्य शम्भुर्ऋषिरनुष्टुप्छन्दः श्रीषोडशीदेवता धर्म्मार्थकाममोक्षसिद्धये विनियोगः ॥ ॐ त्रिपुरा षोडशीमाता त्र्यक्षरा त्रितया त्रयी ॥ सुन्दरी सुमुखी सेव्या सामवेदपरायणा ॥३॥ शारदा शब्दनिलया सागरा सरिताम्बरा ॥ शुद्धाशुद्धतनुस्साध्वी शिवध्यानपरायणा ॥४॥ स्वामिनी शम्भुवनिता शाम्भवी च सरस्वती ॥ समुद्रमथिनी शीघ्रगामिनी शीघ्रसिद्धदा ॥५॥

साधुसेव्या साधुगम्या साधुसन्तुष्टमानसा ॥ खट्वाङ्गधारिणी खर्व्वा खड्गखर्प्पर-धारिणी ॥६॥ षड्वर्गभावरहिता षड्वर्गपरिचारिका ॥ षड्वर्गा च षडङ्गा च षोढा षोडशवार्षिकी ॥७॥ ऋतुरूपा ऋतुमती ऋभुक्षाऋतुमण्डिता ॥ कवर्गादि-पवर्गान्ता अन्वस्थानन्तरूपिणी ॥८॥ अकाराकाररहिता कालमृत्युजरापहा ॥ तन्वी तत्त्वेश्वरी तारा त्रिवर्षा ज्ञानरूपिणी ॥९॥ काली कराली कामेशी च्छाया सञ्ज्ञाप्यरुन्धती ॥ निर्व्विकल्पा महावेगा महोत्साहा महोदरी ॥१०॥ मेघा बलाका विमला विमलज्ञानदायिनी ॥ गौरी वसुन्धरा गोप्त्री गवाम्पतिनिषेविता ॥११॥ भगाङ्गा भगरूपा च भक्तिभावपरायणा ॥ छिन्नमस्ता महाधूमा तथा धूम्रविभू-षणा ॥१२॥ धर्म्मकर्म्मादिरहिता धर्म्मकर्म्मपरायणा ॥ सीता मातङ्गिनी मेधा मधुदैत्यविनाशिनी ॥१३॥ भैरवी भुवना माताऽभयदा भवसुन्दरी ॥ भावुका बगला कृत्या बाला त्रिपुरसुन्दरी ॥१४॥ रोहिणी रेवती रम्या रम्भा रावण-वन्दिता ॥ शतयज्ञमयी सत्त्वा शतक्रतुवरप्रदा ॥१५॥ शतचन्द्रानना देवी सहस्रा-दित्यसन्निभा ॥ सोमसूर्य्याग्निनयना व्याघ्रचर्म्माम्बरावृता ॥१६॥ अर्द्धेन्दुधारिणी मत्ता मदिरा मदिरेक्षणा ॥ इति ते कथितङ्गोप्यन्नाम्नामष्टोत्तरं शतम् ॥१७॥ सुन्दर्य्याः सर्व्वदं सेव्यम्महापातकनाशनम् ॥ गोपनीयङ्गोपनीयङ्गोपनीयङ्कलौ युगे ॥१८॥ सहस्रनामपाठस्य फलँ य्यद्वै प्रकीर्त्तितम् ॥ तस्मात्कोटिगुणम्पुण्यं स्तव-स्यास्य प्रकीर्तनात् ॥१९॥ पठेत्सदा भक्तियुतो नरो यो निशीथकालेऽप्यरुणोदये वा ॥ प्रदोषकाले नवमीदिनेऽथवा लभेत भोगान्परमाद्भुतान् प्रियान् ॥२०॥ इति ब्रह्मयामले पूर्व्वखण्डे षोडश्यष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥

अथ सहस्रनाम

कैलाशशिखरे रम्ये नानारत्नोपशोभिते ॥ कल्पपादपमध्यस्थे नानापुष्पोप-शोभिते ॥ मणिमण्डपमध्यस्थे मुनिगन्धर्व्वसेविते ॥ तङ्कश्चित्सुखमासीन-म्भगवन्तञ्जगद्गुरुम् ॥ कपालखट्वाङ्गधरञ्चन्द्रार्द्धकृतशेखरम् ॥ त्रिशूल-डमरूहस्तम्महावृषभवाहनम् ॥ जटाजूटधरन्देवं व्वासुकींकण्ठभूषणम् ॥ विभूतिभूषणन्देवन्नीलकण्ठन्त्रिलोचनम् ॥ द्वीपिचर्म्मपरीधानं शुद्धस्फटिकसन्निभम् ॥ सहस्रादित्यसङ्काशङ्गिरिजार्द्धांगभूषणम् ॥ प्रणम्य शिरसा नाथङ्कारणं व्विश्वरूपिणम् ॥ कृताञ्जलिपुटो भूत्वा प्राहैनं शिखिवाहनः ॥ कार्त्तिकेय उवाच ॥ देवदेव जगन्नाथ सृष्टिस्थितिलयात्मक ॥ त्वमेव परमात्मा च त्वङ्गतिः सर्वदेहि-नाम् ॥ त्वं ग्गतिस्सर्व्वलोकानान्दीनानञ्च त्वमेव हि त्वमेव जगदाधारस्त्वमेव विश्वकारणः ॥ त्वमेव पूज्यस्सर्व्वेषान्त्वदन्यो नास्ति मे गतिः ॥ किंगुह्यम्परमं ल्लोके किमेकं सर्व्वसिद्धिदम् ॥ किमेकम्परमं श्रेष्ठङ्कि य्योगं स्वर्गमोक्षदम् ॥ विना तीर्त्थेन तपसा विना दानैर्व्विना मखैः ॥ बिना लयेन ध्यानेन नरः सिद्धिम-वाप्नुयात् ॥ कस्मादुत्पद्यते सृष्टिः कस्मिंश्च प्रलयो भवेत् ॥ कस्मादुत्तीर्य्यते

देव संसाराण्णंवसङ्कटात् ।। तदहं श्रोतुमिच्छामि कथयस्व महेश्वर ।। ईश्वर उवाच ।। साधु साधु त्वया पृष्टम्पार्व्वतीप्रियनन्दन ।। अस्ति गुह्यतमम्पुत्र कथयिष्याम्यसंशयम् ।। सत्त्व रजस्तमश्चैव ये चान्ये महादादयः ।। ये चान्ये वहवो भूताः सर्व्वप्रकृतिसम्भवाः ।। सैव देवी पराशक्तिर्म्महात्रिपुरसुन्दरी ।। सैव प्रसूयते विश्वं विश्वं सैव प्रयास्यति ।। सैव संहरते विश्वञ्जगदेतच्चराचरम् ।। आधारस्सर्व्वभूतानां सैव रोगार्त्तिहारिणी ।। इच्छाज्ञानक्रियाशक्तिर्ब्ब्रह्मविष्णुशिवाह्वयः ।। त्रिधा शक्ति स्वरूपेण सृष्टिस्थितिविनाशिनी ।। सृज्यते ब्रह्मरूपेण विष्णुरूपेण पाल्यते ।। संहरेद्रुद्ररूपेण जगदेतच्चराचरम् ।। यस्या योनौ जगत्सर्व्वमद्यापि परिवर्त्तते ।। यस्याम्प्रलीयते चान्ते यस्याञ्च जायते पुनः ।। यां समाराध्य त्रैलोक्यं सम्प्राप्तम्पदमुत्तमम् ।। तस्या नाम सहस्रन्तु कथयामि शृणुष्व तत् । ॐ अस्य श्री महात्रिपुरसुन्दरीसहस्रनामस्तोत्रमन्त्रस्य श्रीभगवान्दक्षिणामूर्त्तिऋषिः जगतीच्छन्दः समस्तप्रकटगुप्तसम्प्रदायकुलकौलोत्तीर्ण्णनिर्ग्गर्भरहस्याचिन्त्यप्रभावती देवता ॐ बीजम् ।। मायाशक्तिः कामराजबीजकीलकम् जीवो बीजम् सुषुम्ना नाडी सरस्वती शक्तिर्धर्म्मार्त्थकाममोक्षार्त्थे जपे विनियोगः ।। आधारे तरुणार्क्कविम्व रुचिरं हेमप्रभम्वाग्भवम्बीजम्मन्मथमिन्द्रगोपसदृशं हृत्पङ्कजे संस्थितम् ।। विष्णुब्रह्मपदस्थशक्तिकलितं सोमप्रभाभासुरंय्ये ध्यायन्ति पदत्रयन्तव शिवे ते यान्ति सौख्यम्पदम् ।। कल्याणी कमला काली कराली कामरूपिणी ।। कामाख्या कामदा काम्या कामना कामचारिणी ।। कालरात्रिर्म्महारात्रिः कपाणी कालरूपिणी ।। कौमारी करुणामुक्तिः कलिकल्मषनाशिनी ।। कात्यायनी कराधारा कौमुदी कमलप्रिया ।। कीर्त्तिदा बुद्धिदा मेधा नीतिज्ञा नीतिवत्सला ।। माहेश्वरी महामाया महातेजा महेश्वरी ।। महाजिह्वा महाघोरा महादंष्ट्रा महाभुजा ।। महामोहान्धकारघ्नी महामोक्षप्रदायिनी ।। महादारिद्र्यनाशा च महाशत्रुविमर्दिनी ।। महामाया महावीर्य्या महापातकनाशिनी ।। महामखा मन्त्रमयी मणिपूरकवासिनी ।। मानसी मानदा मान्या मनश्चक्षू रणेचरा ।। गणमाता च गायत्री गणगन्धर्व्वसेविता ।। गिरिजा गिरिशा साध्वी गिरिस्था गिरिवल्लभा ।। चण्डेश्वरी चण्डरूपा प्रचण्डा चण्डमालिनी ।। चर्विका चर्चिकाकारा चण्डिका चारुरूपिणी ।। यज्ञेश्वरी यज्ञरूपा जपयज्ञपरायणा ।। यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसम्भवा ।। सिद्धयज्ञक्रियासिद्धिर्य्यज्ञाङ्गी यज्ञरक्षिका ।। यज्ञक्रिया यज्ञरूपा यज्ञाङ्गी यज्ञरक्षिका ।। यज्ञक्रिया च यज्ञा च यज्ञायज्ञक्रियालया ।। जालन्धरी जगन्माता जातवेदा जगत्प्रिया ।। जितेन्द्रिया जितक्रोधा जननी जन्मदायिनी ।। गङ्गा गोदावरी चैव गौमती च शतद्रुका ।। घर्घरा वेदगर्भा च रेचिका समवासिनी ।। सिन्धुर्म्मन्दाकिनी क्षिप्रा यमुना च सरस्वती ।। भद्रा रागविपाशा च गण्डकी विन्ध्यवासिनी ।। नर्मदा सिन्धु कावेरी वेत्रवत्या सुकौशिकी ।। महेन्द्रतनया चैव अहल्या चर्म्मकावती ।। अयोध्या

मथुरा माया काशी काञ्चो अवन्तिका ।। पुरी द्वारावती तीर्था महाकिल्बिषनाशिनी ।। पद्मिनी पद्ममध्यस्था पद्मकिञ्जल्कवासिनी ।। पद्मवक्त्रा चकोराक्षी पद्मस्था पद्मसम्भवा ह्रींङ्कारो कुण्डलीधारी हृत्पद्मस्था सुलोचना ।। श्रीङ्कवरीभूषणा लक्ष्मीः क्लीङ्कारी क्लेशनाशिनी ।। हरिवक्त्रोद्भवा शान्ता हरिवक्त्रकृतालया ।। हरिवक्त्रोद्भवा शान्ता हरिवक्षस्स्थलस्थिता ।। वैष्णवी विष्णुरूपा च विष्णुमातृस्वरूपिणी ।। विष्णुमाया विशालाक्षी विशालनयनोज्ज्वला ।। विश्वेश्वरी च विश्वात्मा विश्वेशी विश्वरूपिणी ।। विश्वेश्वरी शिवाराध्या शिवनाथा शिवप्रिया ।। शिवमाता शिवाख्या च शिवदा शिवरूपिणी ।। भवेश्वरी भवाराध्या भवेशीभवनायिका ।। भवमाता भवगम्या भवकण्टकनाशिनी ।। भवप्रिया भवानन्दा भवानी भवमोहिनी ।। गायत्री चैव सावित्री ब्रह्माणी ब्रह्मरूपिणी । ब्रह्मेशी ब्रह्मदा ब्रह्मा ब्रह्माणी ब्रह्मवादिनी ।। दुर्ग्गस्था दुर्ग्गरूपा च दुर्ग्गा दुर्ग्गार्त्तिनाशिनी ।। सुगमा दुर्ग्गमा दान्ता दया दोग्ध्री दुरापहा ।। दुरितघ्नी दुराध्यक्षा दुरा दुष्कृतनाशिनी ।। पञ्चास्या पञ्चमी पूर्ण्णा पूर्ण्णपीठनिवासिनी ।। सत्त्वस्था सत्त्वरूपा च सत्त्वस्था सत्त्वसम्भवा ।। रजस्स्था च रजोगुणसमुद्भवा ।। तमस्स्था च तमोरूपा तामसी तामसप्रिया ।। तमोगुणसमुद्भूता सात्त्विकी राजसी कला ।। काष्ठा मुहूर्ता निमिषा अनिमेषा ततः परम् । अर्द्धमासा च मासा च सँव्वत्सरस्वरूपिणी ।। योगस्था योगरूपा च कल्पस्था कल्परूपिणी ।। नानारत्नविचित्राङ्गी नानाभरणमण्डिता ।। विश्वात्मिका विश्वमाता विश्वपाशविनाशिनी ।। विश्वासकारिणी विश्वा विश्वशक्तिविचारणा ।। यवाकुसुमसङ्काशा दाडिमीकुसुमोपमा ।। चतुरंगी चतुर्व्वाहुश्चतुराचारवासिनी ।। सर्वेशी सर्व्वदा सर्व्वो सर्व्वदा सर्व्वदायिनी ।। माहेश्वरी च सर्व्वाद्या शर्व्वाणी सर्वमङ्गला ।। नलिनी नन्दिनी नन्दा आनन्दा नन्दवर्द्धिनी ।। व्यापिनी सर्व्वभूतेषु भवभारविनाशिनी ।। सर्व्वशृङ्गारवेषाढ्या पाशांकुशकरोद्यता ।। सूर्यकोटिसहस्राभा चन्द्रकोटिनिभानना ।। गणेशकोटिलावण्या विष्णुकोट्यरिमर्दिनी ।। दावाग्निकोटिनलिनी रुद्रकोट्युग्ररूपिणी ।। समुद्रकोटिगम्भीरा वायुकोटिमहाबला ।। आकाशकोटिविस्तारा यमकोटिभयङ्करी ।। मेरुकोटि समुच्छ्राया गणकोटि समृद्धिदा । निष्कस्तोका निराधारा निर्गुणा गुणवर्ज्जिता ।। अशोका शोकरहिता तापत्रयविवर्ज्जिता ।। वसिष्ठा विश्वजननी विश्वाख्या विश्ववर्द्धिनी ।। चित्रा विचित्रचित्राङ्गी हेतुगर्भा कुलेश्वरी ।। इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिः शुचिस्मिता ।। शुचिः स्मृतिमयी सत्या श्रुतिरूपा श्रुतिप्रिया ।। महासत्त्वमयी सत्त्वा पञ्चतत्त्वोपरिस्थिता ।। पार्व्वती हिमवत्पुत्री पारस्था पाररूपिणी ।। जयन्ती भद्रकाली च अहल्या कुलनायिका ।। भूतधात्री च भूतेशी भूतस्था भूतभावना ।। महाकुण्डलिनी शक्तिर्म्महाविभववर्द्धिनी ।। हंसाक्षी हंसरूपा च हंसस्था हंसरूपिणी ।। सोमसूर्य्याग्निमध्यस्था मणिमण्डलवासिनी ।। द्वादशार-

सरोजस्था सूर्य्यमण्डलवासिनी ।। अकलङ्का शशाङ्काभा षोडसारनिवासिनी ।। डांकिनी राकिनी चैव लाकिनी काकिनी तथा ।। शाकिनी हाकिनी चैव षट्चक्रेषु निवासिनी ।। सृष्टि स्थितिविनाशाय सृष्टिस्थित्यन्तकारिणी ।। श्रीकण्ठप्रिय-हृत्कण्ठा नन्दाख्या त्रिन्दुमालिनी ।। चतुष्षष्टिकलाधारा देहदण्डसमाश्रिता ।। माया काली धृतिर्म्मेधा क्षुधा तुष्टिर्म्महाद्युतिः ।। हिङ्गला मङ्गला सीता सुषुम्ना-मध्यगामिनी ।। परघोरा करालाक्षी विजया जयदायिनी ।। हृत्पद्मनिलया भीम-महाभैरवनादिनी ।। आकाशलिङ्गसम्भूता भुवनोद्यानवासिनी ।। महत्सूक्ष्मा च कङ्काली भीमरूपा महाबला ।। मेनकागर्ब्भसम्भूता तप्तकाञ्चनसन्निभा ।। अन्त-रस्था कूटवीजा त्रिकूटाचलवासिनी ।। वर्ण्णाख्या वर्ण्णरहिता पञ्चाशद्वर्ण्ण-भेदिनी ।। विद्याधरी लोकधात्री अप्सरा अप्सर ऽ प्रिया ।। दीक्षा दाक्षायणी दक्षा दक्षयज्ञविनाशिनी ।। यश ऽ पूर्ण्णा यशोदा च यशोदागर्ब्भसम्भवा ।। देवकी देव-माता च राधिका कृष्णवल्लभा ।। अरुन्धती शचीन्द्राणी गान्धारी गन्धमालिनी ।। ध्यानातीता ध्यानगम्या ध्यानज्ञा ध्यानधारिणी ।। लम्बोदरी च लम्बोष्ठी जाम्ब-वन्ती जलोदरी ।। महोदरी मुक्तकेशी मुक्तकामार्त्थसिद्धिदा ।। तपस्विनी तपोनिष्ठा सुपर्ण्णा धर्म्मवासिनी ।। बाणचापधरा धीरा पाञ्चाली पञ्चमप्रिया ।। गुह्याङ्गी च सुभीमा च गुह्यतत्त्वा निरञ्जना ।। अशरीरा शरीरस्था संसारार्ण्णवतारिणी ।। अमृता निष्कला भद्रा सकला कृष्णपिङ्गला ।। चक्रप्रिया च चक्राह्वा पञ्चचक्रादि-दारिणी ।। पद्मरागप्रतीकाशा निर्म्मलाकाशसन्निभा ।। अधःस्था ऊद्र्ध्वरूपा च ऊद्र्ध्वपद्मनिवासिनी ।। कार्य्यकारणकर्त्तृत्वे शश्वद्रूपेषु संस्थिता ।। रसज्ञारस मध्यस्था गन्धस्था गन्धरूपिणी ।। परब्रह्मस्वरूपा च परब्रह्मनिवासिनी ।। शब्द-ब्रह्मस्वरूपा च शब्दस्था शब्दवर्ज्जिता ।। सिद्धिर्ब्बुद्धि ऽ पराबुद्धिः सन्दीप्ति-र्म्मध्यसंस्थिता ।। स्वगुह्याशाम्भवी-शक्तिस्तत्त्वस्था तत्त्वरूपिणी ।। शाश्वती भूत-माता च महाभूताधिपप्रिया ।। शुचिप्रेता धर्म्मसिद्धिर्धर्म्मवृद्धि ऽ पराजिता ।। कामसन्दीपिनी कामा सदा कौतूहलप्रिया ।। जटाजूटधरा मुक्ता सूक्ष्मा शक्ति विभू-षणा ।। द्वीपिचर्म्मपरीधाना चीरवल्कलधारिणी ।। त्रिशूलडमरूधरा नरमाला-विभूषणा ।। अत्युग्ररूपिणी चोग्रा कल्पान्तदहनोपमा ।। त्रैलोक्यसाधिनी साध्या सिद्धिसाधकवत्सला ।। सर्व्वविद्यामयी सारा चासुराणां व्विनाशिनी ।। दमनी दामनी दान्ता दया दोग्ध्री दुरापहा ।। अग्निजिह्वोपमा घोरा घोरघोर तरानना ।। नारायणी नारसिंही नृसिंह हृदयेस्थिता ।। योगेश्वरी योगरूपा योगमाता च योगिनी ।। खेचरी खेचरी खेला निर्व्वाणपदसंश्रया ।। नागिनी नागकन्या च सुवेशा नागनायिका ।। विषज्वालावती दीप्ता कलाशतविभूषणा ।। तीव्रवक्त्रा महावक्त्रा नागकोटित्वधारिणी ।। महासत्त्वा च धर्म्मज्ञा धर्म्मातिसुखदायिनी ।। कृष्णमूर्द्धा घोरमूर्द्धा वरानना ।। सर्व्वेन्द्रियमनोन्मत्ता सर्व्वेन्द्रियमनोमयी ।। सर्व्वसङ्ग्राम-

जयदा सर्व्वप्रहरणोद्यता ।। सर्व्वपीडोपशमनी सर्व्वारिष्टनिवारिणी ।। सर्व्वैश्वर्य्यसमुत्पन्ना सर्व्वग्रहविनाशिनी ।। मातङ्गी मत्तमातङ्गी मातङ्गीप्रियमण्डला ।। अमृतोदधिमध्यस्था कटिसूत्रैरलङ्‌कृता ।। अमृतोदधिमध्यस्था प्रवालवसनाम्बुजा ।। मणिमण्डलमध्यस्था ईषत्प्रहसितानना ।। कुमुदा ललिता लोला लाक्षा लोहित लोचना ।। दिग्वासा देवदूती च देवदेवाधिदेवता ।। सिंहोपरिसमारूढा हिमाचल निवासिनी ।। अट्टाट्टहासिनी घोरा घोरदैत्यविनाशिनी ।। अत्युग्ररक्तवस्त्राभा नागकेयूरमण्डिता ।। मुक्ताहारलतोपेता तुङ्गपीनपयोधरा ।। रक्तोत्पलदलाकारा मदाघूर्णितलोचना ।। समस्तदेवतामूर्तिः सुरारिक्षयकारिणी ।। खड्गिनी शूलहस्ता च चक्रिणी चक्रमालिनी ।। शङ्खिनीचापिनीवाणी वज्रिणी वज्रदण्डिनी ।। आनन्दोदधिमध्यस्था कटिसूत्रैरलङ्‌कृता ।। नानाभरणदीप्ताङ्गा नानामणिविभूषिता ।। जगदानन्दसम्भूता चिन्तामणिगुणान्विता ।। त्रैलोक्यनमिता तुर्य्या चिन्मयानन्दरूपिणी ।। त्रैलोक्यनन्दिनी देवी दुःखदुस्स्वप्ननाशिनी ।। घोराग्निदाहशमनी राज्यदेवार्थसाधिनी ।। महापराधराशिघ्नी महाचौरभयापहा ।। रागादिदोषरहिता जरामरणवर्जिता ।। चन्द्रमण्डलमध्यस्था पीयूषार्णवसम्भवा ।। सर्व्वदेवैः स्तुता देवी सर्व्वसिद्धैर्न्नमस्कृता ।। अचिन्त्यशक्तिरूपा च मणिमन्त्रमहौषधी ।। अस्तिस्वस्तिमयी बाला मलयाचलवासिनी ।। धात्री विधात्री संहारी रतिज्ञा रतिदायिनी ।। रुद्राणी रुद्ररूपा च रुद्ररौद्रार्त्तिनाशिनी ।। सर्व्वज्ञा चैव धर्म्मज्ञा रसज्ञा दीनवत्सला ।। अनाहता त्रिनयना निर्भारा निर्व्वृतिः परा ।। पराघोरा करालाक्षी सुमती श्रेष्ठदायिनी ।। मन्त्रालिका मन्त्रगम्या मन्त्रमाला सुमन्त्रिणी ।। श्रद्धानन्दा महाभद्रा निर्द्वन्द्वा निर्गुणात्मिका ।। धरणी धारिणी पृथ्वी धरा धात्री वसुन्धरा ।। मेरुमन्दरमध्यस्था स्थितिः शंकरवल्लभा ।। श्रीमती श्रीमयी श्रेष्ठा श्रीकरी भावभाविनी ।। श्रीदा श्रीमा श्रीनिवासा श्रीमती श्रीमताङ्गतिः ।। उमा सारङ्गिणी कृष्णा कुटिला कुटिलालका ।। त्रिलोचना त्रिलोकात्मा पुण्यपुण्या प्रकीर्त्तिता ।। अमृता सत्यसंकल्पा सासत्या ग्रन्थिभेदिनी ।। परेशी परमा साध्या पराविद्या परात्परा ।। सुन्दराङ्गी सुवर्णाभा सुरासुरनमस्कृता ।। प्रजा प्रजावती धन्या धनधान्यसमृद्धिदा ।। ईशानी भुवनेशानी भवानी भुवनेश्वरी ।। अनन्तानन्तमहिता जगत्सारा जगद्भवा ।। अचिन्त्यात्मा चिन्त्यशक्तिश्चिन्त्याचिन्त्यस्वरूपिणी ।। ज्ञानगम्या ज्ञानमूर्त्तिर्ज्ज्ञानिनी ज्ञानशालिनी ।। असिता घोररूपा च सुधाधारा सुधावहा ।। भास्करी भास्वती भीतिभस्विदक्षानुशायिनी ।। अनसूया क्षमा लज्जा दुर्ल्लभा भरणात्मिका ।। विश्वघ्नी विश्ववीरा च विश्वघ्नी विश्वसंस्थिता ।। शीलस्था शीलरूपा च शीलाशीलप्रदायिनी ।। बोधनी बोधकुशला रोधनी बोधनी तथा ।। विद्योतिनी विचित्रात्मा विद्युत्पटलसन्निभा ।। विश्वयोनिर्म्महायोनिः कर्म्मयोनिः प्रियात्मिका ।। रोहिणी रोगशमनी महारोगज्वरापहा ।। रसदा

पुष्टिदा पुष्टिम्मानदा मानवप्रिया ।। कृष्णाङ्गवाहिनी कृष्णा कृष्णा कृष्णसहोदरी ।। शाम्भवी शम्भुरूपा च शम्भुस्था शम्भुसम्भवा ।। विश्वोदरी योगमाता योगमुद्राष्च योगिनी ।। वागीश्वरी योगनिद्रा योगिनीकोटिसेविता ।। कौलिका मन्दकन्या च शृङ्गारपीठवासिनी ।। क्षेमङ्करी सर्व्वरूपा दिव्यरूपा दिगम्बरी ।। धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धूसरा ।। पिनाकी रुद्रवेताली महावेतालरूपिणी ।। तपिनी तापिनी दीक्षा विष्णु विद्यात्मनाश्रिता ।। मन्थरा जठरा तीव्रा अग्निजिह्वा भयापहा ।। पशुघ्नी पशुरूपा च पशुहा पशुवाहिनी ।। पिता माता च धीरा च पशुपाशविनाशिनी ।। चन्द्रप्रभा चन्द्ररेखा चन्द्रकान्तिविभूषिणी ।। कुंकुमांकित सर्व्वाङ्गी सुधासद्गुरुलोचना ।। शुक्लाम्बरधरा देवी वीणापुस्तकधारिणी ।। ऐरावत पद्मधारा श्वेतपद्मासनस्थिता ।। रक्ताम्बरधरा देवी रक्तपद्मविलोचना ।। दुस्तरा तारिणो तारा तरुणी ताररूपिणी ।। सुधाधारा च धर्म्मज्ञा धर्म्मसङ्गोपदेशिनो ।। भगेश्वरी भगाराध्या भगिनी भगनायिका ।। भगबिम्बाभगक्लिन्ना भगयोनिर्भगप्रदा ।। भगेश्वरी भगाराध्या भगिनी भगनायका ।। भगेशी भगरूपा च भगगुह्या भगावहा ।। भगोदरी भगानन्दा भगस्था भगशालिनी ।। सर्व्वसङ्क्षोभिणी शक्तिस्सर्व्वविद्राविणी तथा ।। मालिनी माधवी माध्वी मधुरूपा महोत्कटा ।। भरुण्डचन्द्रिका ज्योत्स्ना विश्वचक्षुस्तमोपहा ।। सुप्रसन्ना महादूती यमदूती भयङ्करी ।। उन्मादिनी महारूपा दिव्यरूपा सुरार्च्चिता ।। चैतन्यरूपिणी नित्या क्लिन्ना काममदोद्धता ।। मदिरानन्दकैवल्या मदिराक्षी मदालसा ।। सिद्धेश्वरी सिद्धविद्या सिद्धाद्या सिद्धसम्भवा ।। सिद्धर्द्धिः सिद्धमाता च सिद्धिस्सर्व्वार्त्थसिद्धिदा ।। मनोमयी गुणातीता परञ्ज्योतिः स्वरूपिणी ।। परेशी परगा पारा परासिद्धिः परागतिः ।। त्रिमला मोहिनी आद्या मधुपानपरायणा ।। वेदवेदाङ्गजननी सर्व्वशास्त्रविशारदा ।। सर्व्वदेवमयी विद्या सर्व्वशास्त्रमयी तथा ।। सर्व्वज्ञानमयी देवी सर्व्वधर्म्ममयीश्वरी ।। सर्व्वयज्ञमयी यज्ञा सर्व्वमन्त्राधिकारिणो ।। सर्व्वसम्पत्प्रतिष्ठात्री सर्व्वविद्राविणी परा ।। सर्व्वसङ्क्षोभिणी देवी सर्व्वमङ्गलकारिणो ।। सर्व्वकामप्रदा देवी सर्व्वदुःखविमोचिनी । सर्व्वमृत्युप्रशमनी सर्व्वविघ्नविनाशिनी ।। सर्व्वाङ्गसुन्दरी माता सर्व्वसौभाग्यदायिनी ।। सर्व्वज्ञा सर्व्वशक्तिश्च सर्वैश्वर्य्यफलप्रदा ।। सर्व्वज्ञानमयी देवी सर्व्वव्याधिविनाशिनी ।। सर्व्वाधारस्वरूपा च सर्व्वपापहरा तथा ।। सर्वानन्दमयी देवी सर्व्वेक्षायाः स्वरूपिणी ।। सर्व्वलक्ष्मीमयी विद्या सर्व्वेप्सितफलप्रदा ।। सर्व्वारिष्टप्रशमनी परमानन्ददायिनी ।। त्रिकोणनिलया त्रिस्था त्रिमात्रा त्रितनुस्थिता ।। त्रिवेणी त्रिपथा त्रिस्था त्रिमूर्त्तिस्त्रिपुरेश्वरो ।। त्रिधाम्नी त्रिदशाध्यक्षा त्रिवित्त्रिपुरवासिनी ।। त्रयीविद्या च त्रिशिरा त्रैलोक्या च त्रिपुष्करा ।। त्रिकोटरस्था त्रिविधा त्रिपुरा त्रिपुरात्मिका ।। त्रिपुराश्री त्रिजननी त्रिपुरात्रिपुरसुन्दरो ।। इदन्त्रिपुरसुन्दर्य्याः स्तोत्रन्नाम सहस्रकम् ।। गुह्याद्गुह्यतरम्पुत्र

तव प्रीत्यै प्रकीत्तितम् ।। गोपनीयम्प्रयत्नेन पठनीयम्प्रयत्नतः ।। नात ऽ परतर-म्पुण्यन्नात ऽ परतरन्तपः ।। नात ऽ परतरं स्तोत्रन्नात ऽ परतरा गतिः ।। स्तोत्रं सहस्रनामाख्यं मम वक्त्राद्विनिर्गतम् ।। य ऽ पठेत्प्रयतो भक्त्या शृणुयाद्वा समाहितः ।। मोक्षात्र्थी लभते मोक्षं स्वर्गार्थी स्वर्गमाप्नुयात् ।। कामांश्च प्राप्नु-यात्कामी धनात्र्थी च लभेद्धनम् ।। विद्यात्र्थी लभते विद्या य्यशोत्र्थी लभते यशः ।। कन्यात्र्थी लभते कन्यां सुतात्र्थी लभते सुतम् ।। गुर्व्विणी जनयेत्पुत्रङ्कन्या विन्दति सत्पतिम् ।। मूर्खोऽपि लभते शास्त्रं हीनोऽपि लभते गतिम् ।। सङ्क्रान्त्या व्वार्कमावस्यामष्टम्याञ्च विशेषतः ।। पौर्णमास्याञ्चतुर्द्दश्यान्नवम्याम्भौम-वासरे ।। पठेद्वा पाठयेद्वापि शृणुयाद्वा समाहितः ।। स मुक्तस्सर्वपापेभ्य ऽ कामेश्वर-समो भवेत् ।। लक्ष्मी वान्धर्मवांश्चैव वल्लभस्सर्व्वयोषिताम् ।। तस्य वश्यम्भवेदाशु त्रैलोक्यं सच राचरम् ।। रुद्रन्दृष्ट्वा यथा देवा विष्णुन्दृष्ट्वा च दानवाः ।। यथा-हिर्ग्गरुडन्दृष्ट्वा सिंहन्दृष्ट्वा यथा गजाः ।। कीटवत्प्रपलायन्ते तस्य वक्त्रावलो-कनात् ।। अग्निचौरभयन्तस्य कदाचिन्नैव सम्भवेत् ।। पातका विविधाः शान्ति-म्मेरुपर्व्वतसन्निभाः ।। यस्मात्तच्छृणुयाद्विघ्नांस्तृणं व्वह्निहुतं य्यथा ।। एकदा पठनादेव सर्व्वपापक्षयो भवेत् ।। दशधा पठनादेव वाचा सिद्धि ऽ प्रजायते ।। शतधा पठनाद्वापि खेचरो जायते नरः ।। सहस्रदशसङ्ख्यातँ य्य ऽ पठेद्भक्तिमा-नसः ।। मातास्य जगतान्धात्री प्रत्यक्षा भवति ध्रुवम् ।। लक्षपूर्णे यथा पुत्र स्तोत्र-राजम्पठेत्सुधीः ।। भवपाशविनिर्म्मुक्तो मम तुल्यो न संशयः ।। सर्वतीर्थेषु यत्पुण्यं सकृज्जप्त्वा लभेन्नरः ।। सर्व्ववेदेषु यत्प्रोक्तन्तत्फलम्परिकीर्त्तितम् ।। भूत्वा च बलवान्पुत्र धनवान्सर्व्वसम्पदः ।। देहान्ते परमं स्थानं य्युत्सुरैरपि दुर्ल्लभम् ।। स यास्यति न सन्देहः स्तवराजस्य कीर्त्तनात् ।।

।। इति श्री वामकेश्वर तन्त्रे हर कुमार सम्वादे महात्रिपुरसुन्दर्याः
षोडश्याः सहस्रनामस्तोत्रम् समाप्तम् ।।

तन्त्र राजोक्तं नित्याकवचम्

समस्तापद्विमुक्त्यर्थं सर्वसम्पदवाप्तये ।
भूतप्रेतपिशाचादिपीडाशान्त्यै सुखाप्तये ।।
समस्तरोगनाशाय समरे विजयाय च ।
चौरसिंहद्वीपिगजगवयादि - भयानके ।।
अरण्ये शैलगहने मार्गे दुर्भिक्षके तथा ।
सलिलाग्निमरुत्पीडास्वब्धौ पोतादिसङ्कटे ।।
प्रजप्य नित्याकवचं सकृत्सर्वं तरत्यसौ ।
सुखी जीवति निर्द्वन्द्वो निःसपत्नो जितेन्द्रियः ।।

शृणु तत्कवच देवि ! वक्ष्ये तत्र तदात्मकम् ।
येनाहमपि युद्धेषु देवासुरजयी सदा ॥
सर्वतः सर्वदाऽऽत्मानं ललिता पातु सर्वदा ।
कामेशी पुरतः पातु भगमाला त्वनन्तरम् ॥
दिशं पातु तथा दक्षः पार्श्वं मे पातु सर्वदा ।
नित्यक्लिन्ना तु भेरुण्डा दिशं पातु सदामम ॥
तथैव पश्चिमं भागं रक्षेत्सा वह्निवासिनी ।
महावज्रेश्वरी रक्षेदनन्तरदिशं सदा ॥
वामपार्श्वं सदा पातु दूती मे त्वरिता ततः ।
पालयेत्तु दिशं वात्यां रक्षेन्मां कुलसुन्दरी ॥
नित्या मामूर्ध्वतः पातु साऽधो मे पातु सर्वदा ।
नित्या नीलपताकाख्या विजया सर्वतश्च माम् ॥
करोतु मे मङ्गलानि सर्वदा सर्वमङ्गला ।
देहेन्द्रियमनः प्राणान् ज्वालामालिनिविग्रहा ॥
पालयेदनिशं चित्रा चित्तं मे पातु सर्वदा ॥
कामात् क्रोधात् तथा लोभान्मोहान्मानान्मदादपि ॥
पापान्मत्सरतः शोकात् संशयात्सर्वतः सदा ।
स्तैमित्याच्च समुद्योगादशुभेषु तु कर्मतु ॥
असत्यात्क्रूरचिन्तातो हिंसातश्चौरतस्तथा ।
रक्षन्तु मां सर्वदा ताः कुर्वन्त्विच्छां शुभेषु च ॥
नित्याः षोडशमां पान्तु गजारूढाः स्वशक्तिभिः ।
तथा हयासमारूढाः पान्तु मां सर्वतः सदा ॥
सिंहारूढास्तथा पान्तु मां तरक्षुगता अपि ।
रथारूढाश्च मां पान्तु सर्वतः सर्वदा रणे ॥
ताक्ष्यारूढाश्च मां पान्तु तथा व्योमगतास्तु ताः ।
भूगताः सर्वदा पान्तु मां सर्वत्र च सर्वदा ॥
भूत-प्रेतपिशाचापस्मारकृत्यादिकान् गदान् ।
द्रावयन्तु स्वशक्तीनां भीषणैरायुधैर्मम ॥
गजाश्वद्वीपिपञ्चास्यताक्ष्यारूढाखिलायुधाः ।
असंख्या शक्तयो देव्याः पान्तु मां सर्वतः सदा ॥
सायं प्रातर्जपन्नित्याकवचं सर्वरत्नकम् ।
कदाचिन्नाशुभं पश्येन्न शृणोति च तत्समः ॥

॥ इति तन्त्रराजोक्तं नित्याकवचं समाप्तम् ॥

श्रीसर्वसिद्धिकरश्चण्डीचरित्रस्तवः

यत्कर्मधर्मनिलयं प्रवदन्ति तज्ज्ञा यज्ञादिपुण्यमखिलं सकलं त्वयैव ।
त्वं चेतना यत इति प्रविचार्य चित्ते नित्यं त्वदीयचरणौ शरणम्प्रपद्ये ॥१॥
पाथोधिनाथतनयापतिरेष शेषपर्यङ्कलालितवपुः पुरुषः पुराणः ।
त्वन्मोहपाशविवशो जगदम्ब ! सोऽपि व्याघूर्णमाननयनः शकनञ्चकार ॥२॥
तत्कौतुकं जननि यस्य जनार्दनस्य कर्णप्रसूतमलजौमधुकैटभाख्यौ ।
तस्यापि यौ न भवतः सुलभौनिहन्तुंत्वन्माययाकवलितौ विलयं गतौ तौ ॥३॥
यन्माहिषं वपुरपूर्वबलोपपन्नं यन्नाकनायकपराक्रमजित्वरञ्च ।
यल्लोकशोकजननव्रतबद्धहार्दं तल्लीलयैव दलितं गिरिजे भवत्या ॥४॥
यो धूम्रलोचन इति प्रथितः पृथिव्यां भस्मीवभूव स रणे तव हुङ्कृतेन ।
सर्वासुरक्षयकरे गिरिराजकन्ये मन्ये स्वमन्युदहनेकृत एव होमः ॥५॥
केषामपि त्रिदशनायकपूर्वकाणां हन्तुं न जातु सुलभाविति चण्डमुण्डौ ।
तौ दुर्मदौ सपदि चाम्बरतुल्यभूर्तेर्मातिस्तवासिकुलिशात्पतितौ विशीर्णौ ॥६॥
दौत्येन ते शिव इति प्रथितः प्रभावो देवोऽपि दानवपतेः सदनं जगाम ।
भूयोऽपि तस्य चरितं प्रथयाञ्चकार सा त्वं प्रसीद शिवदूति विजृम्भितेन ॥७॥
चित्रं तदेतदमरैरपि ये न जेयाः शस्त्राभिघातपतिताद्रुधिरादपर्णे ।
भूमौ वभूवुरमिताः प्रतिरक्तबीजास्तेऽपि त्वयैव गगने गिलिताः समस्ताः ॥८॥
आश्चर्यमेतदतुलं यदभूत्सुरारी त्रैलोक्यवैभवविलुण्ठनहृष्टपाणी ।
शस्त्रैर्निहत्य भुवि शुम्भनिशुम्भसञ्ज्ञौनीतौ त्वया जननितावपिनाकलोकम् ॥९॥
त्वत्तेजसि प्रलयकालहुताशनेऽस्मिं स्तस्मिन्प्रयान्ति विलयं भुवनानि सद्यः ।
तस्मिन्निपत्य शलभा इव दानवेन्द्रा भस्मीभवन्ति हि भवानि किमत्र चित्रम् ॥१०॥
तत्किं गृणामि भवतीं भवतीव्रतापनिर्वापणप्रणयिनीं प्रणमज्जनेषु ।
तत्किं गृणामि भवतीं भवतीव्रतापसम्वर्धनप्रणयिनीं विपदि स्थितेषु ॥११॥
वामे करे तदितरे च तथोपरिष्टात् पात्रं सुधारसयुतं वरमातुलुङ्गम् ।
खेटं गदां च दधतीं भवतीं भवानि ध्यायन्ति येऽरुणनिभांकृतिनस्त एव ॥१२॥
यद्वारुणात्परमिदं यदि मानवस्ते बीजं स्मरेदनुदिनं दहनाधिरूढम् ।
मायाङ्कितं तिलकितं तरुणेन्दुविन्दुनातै रमन्दमिह राज्यमसौ भुनक्ति ॥१३॥
आवाहनं यजनवर्णनमग्निहोत्रं कर्मार्पणं तव विसर्जनमत्र देवि ।
मोहान्मया कृतमिदं सकलापराधं मातःक्षमस्व वरदे बहिरन्तरस्थे ॥१४॥
अन्तःस्थिताऽप्यखिलजन्तुषु जन्तुरूपा विद्योतसे बहिरिवाऽखिलविश्वरूपा ।
का भूरि शब्दरचना वचनाधिका सा दीनं जनं जननि ! मामव निष्प्रपञ्चम् ॥१५॥

एतत्पठेदनुदिनं दनुजान्तकारि चण्डीचरित्रमतुलं भुवि यस्त्रिकालम् ।
श्रीमान् सुखी स विजयी सुभगः कृती स्यात् त्यागी चिरन्तनवपुः कविचक्रवर्ती ॥१६॥
श्रीसिद्धनाथपरनामधेयः श्रीशम्भुनाथो भुवनैकनाथः ।
तस्य प्रसादात्सकलागमश्रीः पृथ्वीधरः स्तोत्रमिदं चकार ॥१७॥

॥ श्री पृथ्वीधराचार्य विरचितं सर्वसिद्धिकरं चण्डीचरित्रस्तोत्रं समाप्तम् ॥

श्री ललिताचतुष्षष्ट्युपचार संग्रह

ॐ हृन्मध्यनिलये देवि ललिते परदेवते ।
चतुष्षष्ट्युपचारांस्ते भक्त्या मातः समर्पये ॥१॥
कामेशोत्सङ्गनिलये पाद्यं गृहाणीष्व सादरम् ।
भूषणानि समुत्तार्य गन्धतैलं च तेऽर्पये ॥२॥
स्नानशालां प्रविश्याऽथ तत्रत्यमणिपीठके ।
उपविश्य सुखेन त्वं देहोद्वर्त्तनमाचर ॥३॥
उष्णोदकेन ललिते स्नापयाम्यथ भक्तितः ।
अभिषिञ्चामि पश्चात्त्वां सौवर्णकलशोदकैः ॥४॥
धौतवस्त्रप्रोञ्छनं चारक्तक्षौमाम्बरं तथा ।
कुचोत्तरीयमरुणमर्पयामि महेश्वरि ॥५॥
ततः प्रविश्य चालेपमण्डपं श्रीमहेश्वरि ।
उपविश्य च सौवर्णपीठे गन्धान् विलेपय ॥६॥
कालागुरुजधूपैश्च धूपये केशपाशकम् ।
अर्पयामि च मल्ल्यादिसर्वर्तुकुसुमस्रजः ॥७॥
भूषामण्डपमाविश्य स्थित्वा सौवर्णपीठके ।
माणिक्य मुकुटं मूर्ध्नि दयया स्थापयाऽम्बिके ॥८॥
शरत्पार्वणचन्द्रस्य शकलं तत्र शोभताम् ।
सिन्दूरेण च सीमन्तमलङ्कुरु दयानिधे ॥९॥
भाले च तिलकं न्यस्य नेत्रयोरञ्जनं शिवे ।
वालीयुगलमप्यम्ब भक्त्या ते विनिवेदये ॥१०॥
मणिकुण्डलमप्यम्ब नासाभरणमेव च ।
ताटङ्कयुगलं देवि यावकञ्चाधरेऽर्पये ॥११॥
आद्यभूषणसौवर्णं चिन्ताकपदकानि च ।
महापदक मुक्तावल्येकावल्यादिभूषणम् ॥१२॥
धन्नवीरं गृहाणाऽम्ब केयूरयुगलन्तथा ।
वलयावलिमंगुल्याभरणं ललिताम्बिके ॥१३॥

ओड्याणमथ कट्यन्ते कटिसूत्रञ्च सुन्दरि ।
सौभाग्याभरणं पादकटकं नूपुरद्वयम् ॥१४॥
अर्पयामि जगन्मातः पादयोश्चांगुलीयकम् ।
पाशं वामोर्ध्वहस्ते च दक्षहस्ते तथाङ्कुशम् ॥१५॥
अन्यस्मिन्वामहस्ते च तथा पुण्ड्रेक्षुचापकम् ।
पुष्पबाणांश्च दक्षाधः पाणौ धारय सुन्दरि ॥१६॥
अर्पयामि च माणिक्यपादुके पादयोः शिवे ।
आरोहावृतिदेवीभिश्चक्रं परशिवे मुदा ॥१७॥
समानवेशभूषाभिः साकं त्रिपुरसुन्दरि ।
तत्र कामेशवामाङ्कपर्यङ्कोपनिवेशिनीम् ॥१८॥
अमृतासवपानेन मुदितां त्वां सदा भजे ।
शुद्धेन गाङ्गतोयेन पुनराचमनं कुरु ॥१९॥
कर्पूरवीटिकामास्ये ततोऽम्ब विनिवेशय ।
आनन्दोल्लासहासेन विलसन्मुखपङ्कजाम् ॥२०॥
भक्तिमत्कल्पलतिकां कृती स्यां त्वां स्मरन् कदा ।
मङ्गलारार्तिकं छत्रं चामरं दर्पणं तथा ॥२१॥
तालवृन्तं गन्धपुष्पधूपदीपांश्चतेऽर्पये ।
श्री कामेश्वरि ! तप्तहाटककृतैः स्थालीसहस्रैर्भृतम् ।
दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदैर्युतम् ॥
दुग्धान्नं मधुशर्करादधियुतं माणिक्यपात्रार्पितं ।
भाषापूपकपूरिकादिसहितं नैवेद्यमम्बाऽर्पये ॥२२॥
साग्रविंशतिपद्योक्तचतुष्षष्ट्युपचारतः ।
हृन्मध्यनिलया माता ललिता परितुष्यतु ॥२३॥

॥ इति महायागक्रमोक्तं मानस पूजनम् ॥

श्रीमन्त्र-मातृका-पुष्पमाला

कल्लोलोल्लसितामृताब्धिलहरीमध्ये विराजन्मणि-
द्वीपे कल्पकवाटिकापरिवृते कादम्बवाट्युज्ज्वले ।
रत्नस्तम्भसहस्रनिर्मितसभामध्ये विमानोत्तमे
चिन्तारत्नविनिर्मितं जननि ते सिंहासनं भावये ॥१॥
एणाङ्कानलभानुमण्डललसच्छ्रीचक्रमध्ये स्थितां
बालार्कद्युतिभासुरां करतलैः पाशाङ्कुशौबिभ्रतीम ।

चापं बाणमपि प्रसन्नवदनां कौसुम्भवस्त्रान्वितां
तां त्वां चन्द्रकलावतंसमुकुटां चारुस्मितां भावये ।।२।।
ईशानादिपदं शिवैकफलकं रत्नासनं ते शुभं
पाद्यं कुंकुम चन्दनादिभरितैरर्घ्यं सरत्नाक्षतैः ।
शुद्धैराचमनीयकं तव जलैर्भक्त्या मया कल्पितं
कारुण्यामृतवारिधे तदखिलं सन्तुष्टये कल्पताम् ।।३।।
लक्ष्ये योगिजनस्य रक्षित जगज्जाले विशालेक्षणे
प्रालेयाम्बुपटीरकुंकुमलसत्कर्पूरमिश्रोदकैः ।
गोक्षीरैरपि नारिकेलसलिलैः शुद्धोदकैर्मन्त्रितैः
स्थानं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ।।४।।
ह्रींकाराङ्कितमन्त्रलक्षिततनो हेमाचलात्संचितैः
रत्नैरुज्ज्वलमुत्तरीयसहितं कौसुम्भवर्णांशुकम् ।
मुक्तासन्ततियज्ञसूत्रममलं सौवर्णतन्तूद्भवं
दत्तं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ।।५।।
हंसैरप्यतिलोभनीयगमने हारावलीमुज्ज्वलां
हिन्दोलद्युतिहीरपूरिततरे हेमाङ्गदेकंकणे ।
मञ्जीरौ मणिकुण्डले मुकुटमप्यर्धेन्दुचूडामणिं
नासामौक्तिकमङ्गुलीयकटकौ काञ्चीमपिस्वीकुरु ।।६।।
सर्वाङ्गे घनसारकुंकुमघनश्रीगन्धपङ्काङ्कितं
कस्तूरीतिलक च भालफलके गोरोचनापत्रकम् ।
गण्डादर्शनमण्डले नयनयोर्दिव्याञ्जनं तेऽञ्चितं
कण्ठाब्जे मृगनाभिपंकममल त्वत्प्रीतये कल्पताम् ।।७।।
कल्हारोत्पलमल्लिकामरुवकैः सौवर्णपंकेरुहै-
र्जातीचम्पकमालतीबकुलकैर्मन्दारकुन्दादिभिः ।
केतक्या करवीरकैर्बहुविधैः क्लृप्ताः स्रजो मालिकाः
संकल्पेन समर्पयामि वरदे सन्तुष्टये गृह्यताम् ।।८।।
हन्तारं मदनस्य नन्दयसि यैरङ्गैरनङ्गोज्ज्वलै-
र्यैर्भृङ्गावलिनीलकुन्तलभरैर्बध्नासि तस्याशयम् ।
तानी मानी तवाम्ब कोमलतराव्यामोदलीलागृहा-
ण्यामोदायदशाङ्गगुग्गुलघृतैर्धूपैरहं धूपये ।।९।।
लक्ष्मीमुज्ज्वलयामि रत्ननिवहोद्भास्वत्तरे मन्दिरे
मालारूपविलम्बितैर्मणिमयस्तम्भेषु सम्भावितैः ।
चित्रैर्हाटकपुत्रिकाकरधृतैर्गव्यैर्घृतैर्वर्धितै-
र्दिव्यैर्दीपगणैर्धिया गिरिसुते सन्तुष्टये कल्पताम् ।।१०।।

ह्रींकारेश्वरितप्तहाटककृतैः स्थालीसहस्रैर्भृतं
दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदं तथा ।
दुग्धान्नं मधु शर्करादधियुतं माणिक्यपात्रे स्थितं
माषापूपसहस्रमम्ब सफलं नैवेद्यमावेदये ॥११॥
सच्छायैर्वरकेतकीदलरुचा ताम्बूलवल्लीदलैः
पूगैर्भूरिगुणैः सुगन्धिमधुरैः कर्पूरखण्डोज्ज्वलैः ।
मुक्ताचूर्णविराजितैर्बहुविधैर्वक्त्राम्बुजामोदनैः
पूर्णा रत्नकलाचिका तव मुदे न्यस्तापुरस्तादुमे ॥१२॥
कन्याभिः कमनीयकान्तिभिरलंकारामलारार्तिका
पात्रे मौक्तिकचित्रपंक्तिविलसत्कर्पूरदीपालिभिः ।
तत्तत्तालमृदङ्गगीतसहितं नृत्यत्पदाम्भोरुहं
मन्त्राराधनपूर्वकं सुविहितं नीराजनं गृह्यताम् ॥३१॥
लक्ष्मीर्मौक्तिकलक्ष कल्पितसितच्छत्रं तु धत्ते रसा
दिन्द्राणी च रतिश्च चामरवरे धत्ते स्वयं भारती ।
वीणामेणविलोचनाः सुमनतां नृत्यन्ति तद्रागव-
द्भावैराङ्गिकसात्विकैः स्फुटरसं मातस्तदालोक्यताम् ॥१४॥
ह्रींकारत्रयसम्पुटेन मनुनोपास्ये त्रयीमौलिभि-
र्वाक्यैर्लक्ष्यतनोस्तव स्तुतिविधौको वा क्षमेताम्बिके ।
संलापाः स्तुतयः प्रदक्षिणशतं संचार एवास्तु ते
संवेशो नमसः सहस्रमखिलं त्वत्प्रीतये कल्पताम् ॥१५॥
श्री मन्त्राक्षरमालया गिरिसुतां यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं सुनियतस्तस्यामलं स्यान्मनः ।
चित्ताम्भोरुहमण्डपे गिरि सुता नृत्तं विधत्ते रसा
द्वाणीवक्त्रसरोरुहे जलधिजा गेहे जगन्मङ्गला ॥१६॥
इति गिरिवर पुत्री पादराजीवभूषा
भुवनममलयन्ती सूक्तिसौरभ्यसारैः ।
शिवपदमकरन्दस्यन्दिनीयं निबद्धा
मदयतु कविभृङ्गान्मातृका पुष्पमाला ॥१७॥

॥ इति श्रीमत्परमहंस परिव्राजकार्य श्रीमदाद्यशंकर भगवत्पादा-
चार्य वर्यैः प्रणीता श्री मन्त्रमातृका पुष्पमाला सम्पूर्ण ॥

मकरन्द स्तोत्रम्

श्रीबीजे नादविन्दुद्वितय शशिकलाकाररूपे स्वरूपे,
मातर्मे देहि बुद्धिं जहि जहि जड़तांपाहिमां दीन दीनम् ।
अज्ञान ध्वान्तनाश क्षमरुचि रुचिर प्रोल्लसत्पादपद्मे,
ब्रह्मेशाद्यैः सुरेन्द्रैः सुरगण विनतैः संस्तुतां त्वां नमामि ॥१॥
लज्जा बीजस्वरूपे त्रिजगति वरदे ब्रीड्याया स्थिते यं,
तां नित्यां शम्भु शक्ति त्रिभुवन जननीं पालयन्तीं जगच्च ।
संसारे तान्निदानं सकलगुणमयीं सच्चिदानन्द रूपां,
तेजोरूपां प्रदीप्तां त्रिभुवनतिमिराज्ञानहन्त्रीं नमामि ॥२॥
क्लीं बीजे कामकूटे धृतकुसुमधनुर्बाण पाशाङ्कुशां तां,
वन्देभास्वत्सरोजोदरनिभवपुषं मोहयन्तीं त्रिलोकीम् ।
काञ्ची मंजरी हाराङ्गदमुकुट लसत्स्वर्णमाणिक्य रत्नै,
राजन्तीमिन्दु वक्त्रांस्तनभरनमितांक्षीणमध्यांत्रिनेत्राम् ॥३॥
ऐंवाणी बीजरूपां त्रिभुवन जड़ताध्वान्तविध्वंसिनीं त्वां,
शब्द ब्रह्मस्वरूपा श्रुतिभिरनुपदंगीयमाना त्वमेव ।
मातर्मे देहि बुद्धि ममसदसिपरद्वन्द्वसंक्षोभकर्त्री-
मैन्द्रीं वाचस्पतेरप्यति विविधपदां त्वत्पदाम्भोजमीडे ॥४॥
सौः शक्तिः कार्यं जाते घट पट प्रभृताविष्टहेतौ सहाया,
केचिन्यायासहत्वं प्रकृतिपरिणतौ मूलभूता त्वमेव ।
केचिद्वाह्य प्रपंचे मणिरिव हिमणौ हेतुभूता त्वविद्या-
विद्या विश्रान्ति युग्मक्षय इति जगतां मेनिरेशुद्धभावाः ॥५॥
ओं मातस्ते नमस्ते श्रुतिमथितगुरुत्र्यक्षरे ब्रह्मरूपे,
मिथ्याज्ञानान्धकारे पतितमनुदिनैः पाहिमामक्षहीनम् ।
कामक्रोधप्रतिलोभप्रमदगदचयैः शत्रुभिः पीड्यमानं,
पत्नी पुत्रादि भृत्यैर्नत विविधजनैः श्रृङ्खलाभिर्निबद्धम् ॥६॥
ह्रींकारे ह्रीं स्वरूपे ममदह दुरितं व्याधि दारिद्र्य बीजं
मातस्त्वत्पादपद्मद्वितयपरिसरे प्रार्थये भक्तिमेकाम् ।
त्वं वाणी त्वं च लक्ष्मीस्त्वमसिगिरिसुता ब्रह्मविष्णुत्रिनेत्रं,
श्रीरूपं नित्यसख्यं कृतमिह जननि त्वत्कटाक्षंक वृन्दैः ॥७॥
श्रींकारे श्रीस्वरूपे वितर मयि धनंधान्य हस्त्यश्व युक्तं,
सौख्यं माणिक्यरत्नाद्यभिलषितयुतं त्वत्पदार्चासुयोग्यम् ।

विद्यां त्वं देहि मोक्षमयिभव दहनैर्देविदन्दह्य माने,
योगीन्द्रैः सेव्यमाना हतकलुष चयैर्मोक्षमन्वेष यद्भिः ॥८॥
कामोयोनिश्चतुर्थः स्मरविबुध पतिर्भैविनेशीं च बीजं,
तावद्वर्णावली त्वं नतजनवरदे त्वत्पदे भक्तिमीहे।
त्वत्पादाम्भोजयुग्मं हृदय सरसिजे संनिधायैक चित्ता,
ध्यात्वा तत्कर्मबन्धादतिविमलधियो मुक्तवन्तोमुनीन्द्राः ॥६॥
ब्रह्मेन्दुः कामदेवो वियदमर गुरुर्भैविनेशीं च बीजं,
तावद्वर्णस्विरूपैर्घटित तनुलता त्वां प्रपन्नोऽस्मि मातः।
विष्णु ब्रह्मेश मूर्ध्नि स्थितमुकुटमणि प्रोल्लसत्पाद पद्मं,
योगीन्द्रिध्येय पादाङ्कर नरवर शशिद्योत विद्योतितांत्वाम् ॥१०॥
इन्दुः कामः सुरेशो वियदनल लसद्वामनेत्रार्ध चन्द्रै-
र्युक्तं यद्वीजमे तत्तदपि तव वपुः सच्चिदानन्दरूपम्।
वाला त्वं भैरवी त्वं त्रिभुवनजननी तारणी नीलवाणी,
त्वं गौरी त्वं च काली सकलमनुमयी त्वं महामोक्षदात्री ॥११॥
सौः कारे बीजराजे त्रिभुवन जननी शक्तिराद्या त्वमेव,
त्वद्युक्तः शम्भुरेषप्रभवति चलितुं त्वांविना जाड्यवान्सः।
ब्रह्मा विष्णुः कपर्दी तवजननि कृपालेश मात्राच्छरीरं,
गृह्णन्तः सृष्टि रक्षाप्रलयमविरतं चक्रिरे त्वद्रथस्थाः ॥१२॥
ऐं बीजं वाग्भवाख्यं त्वमिह हि जड़ताध्वान्त चण्डप्रकाशा,
मातः कारुण्यधारामृतगलितदृशापश्य मां नाथहीनम्।
मोह्यन्ते मोहितास्ते तव जननि महामायया बद्धचित्ताः,
कारुण्यं प्रार्थयन्ते तवपदयुगले ज्ञानवन्तो मुनीन्द्राः ॥१३॥
क्लींकारो बीजराजस्तव जननि मनुश्रेष्ठ मध्यप्रवेशा-
त्साक्षाद् ब्रह्मस्वरूपी मदन तनुलता ब्रह्मणो मोदकर्त्ता।
सुज्ञाने स्मेर वक्त्राम्बुज कुहर लसत्सृष्ट पीयूष धारा,
वेदाश्चत्वार एते तुहिनगिरिसुते प्राप्तमीनेन्द्र रूपे ॥१४॥
ह्रींकारोंकाररूपा त्वमिह शशिमुखी ह्रींस्वरूपा त्वमेव,
त्वं क्षान्तिस्त्वं च कान्तिर्हरिहरकमलोद्भूतरूपा त्वमेव।
त्वं सिद्धिस्त्वं च ऋद्धिर्मदनरिपुमनस्त्वं च सम्मोहयन्ती,
विद्या त्वं मुक्तिहेतुर्भव जलधि जनुर्दुःखहन्त्री त्वमेका ॥१५॥
श्रींबीजे श्रीस्वरूपे मधुरिपुमनसोमध्यमध्यासिता त्वं,
मारस्त्वदृष्टि लेशादमरपतिरसौ प्राप्तवान्बुद्धिमेनाम्।

इत्येवं षोडशार्णं जपति मनुवरं स्वर्ग मोक्षंक हेतुं,
सिद्धीरष्टौ लभन्ते य इदमनुदिनं श्रेष्ठमेतद्भजन्ते ।।१६।।
पूजयित्वा विधानेन महात्रिपुरसुन्दरीम् ।
इदं स्तोत्रं पठित्वा तु देवीसायुज्यमाप्नुयात् ।।१७।।

इति शिवोक्तं मकरन्दाख्यं स्तोत्रम् समाप्तम् ।।

त्रैलोक्यमोहन कवचम्

श्री देव्युवाच :

श्रीमत्त्रिपुरसुन्दर्या या या विद्या सुदुर्लभाः ।
कृपया कथिताः सर्वाः श्रुताश्चाधिगतामया ।।
प्राणनाथाधुना ब्रूहि कवचं मन्त्रिविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः कथितं पुरा ।।
इदानीं श्रोतुमिच्छामि सर्वार्थंकवचं स्फुटम् ।।

ईश्वर उवाच :

श्रृणु देवि प्रवक्ष्यामि सुन्दरि प्राणवल्लभे ।
त्रैलोक्य मोहनं नाम सर्वविद्यौघविग्रहम् ।।
यद्धृत्वा दानवान्विष्णुर्निर्जघान मुहुर्मुहुः ।
सृष्टिं वितनुते ब्रह्मा यद्धृत्वा पठनाद्यतः ।।
संहर्ताह यतोदेवि देवेशो वासवो यतः ।
धनाधिपः कुबेरोऽपि यतः सर्वे दिगीश्वराः ।।
न देयं यदशिष्येभ्यो देय शिष्येभ्य एव च ।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वामृत्युमवाप्नुयात् ।।
श्रीमत् त्रिपुरसुन्दर्याः कवचस्य ऋषिः शिवः ।
छन्दोविराट् देवता च श्रीमत्त्रिपुरसुन्दरी ।।
धर्मार्थं काममोक्षेषु विनियोगः प्रकीतितः ।
शिरोमेवाग्भवंपातु 'क ए ई ल ह्रीं' रूपकम् ।।
'ह स क ल ह्रीं' ललाटं पातु कामेश्वरी मम ।
'ह क ह ल ह्रीं' दृशौ मे पातु कामेश्वरी सदा ।।
'क ह ए ल ह्रीं' श्रुती मे सदा पातु तुरीयकम् ।
'ह क ल स ह्रीं' पंचमं पातुजिह्वां च पञ्चमो ।
'क ए ई ल ह्रीं ह स क ल ह्रीं ह क ह ल ह्रीं
क ह ए ल ह्रीं ह क ल स ह्रीं'—
वदनं सदा पातु पञ्चकूटा तु पञ्चमी ।।१।।

'क ए ई ल ह्रीं' घ्राणं मे पातु वाग्भवसंज्ञकम् ।
'ह स क ह ल ह्रीं' कण्ठं पातु कामेशसंज्ञकम् ।
'स क ल ह्रीं' शक्तिकूटं स्कन्धौ पातु सदा मम ।
'क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं' मे-
कामेनोपासिता विद्या कक्षदेशे सदावतु ।।२।।
'क्लीं ह्रीं श्रीं ऐं सौः ओं ह्रीं श्रीं ऐं क्लीं सौः श्रीं
ह्रीं क्लीं ऐं सौः'—
कामादि षोडशी पातु भुजौ त्रिपुरसुन्दरी ।।३।।
'ओं क्लीं ह्रीं श्रीं ऐं क्लीं सौः श्रीं ह्रीं क्लीं स्त्रीं
ऐं क्रों क्रीं श्रीं हुं ।'
तारादि षोडशी पातु मणिवन्ध द्वयं मम ।।४।।
'श्रीं ह्रीं क्लीं ऐं सौः ओं ह्रीं श्रीं ऐं क्लीं सौः
ऐं क्लीं ह्रीं श्रीं'—
रमादि षोडशी पातु करौ त्रिपुरसुन्दरी ।।५।।
'ह्रीं ह् सौः ओं ऐं ह्रीं श्रीं ऐं क्लीं सौः स्त्रीं क्रों
ऐं ह्रीं हूं हूं श्रीं'—
मायादि षोडशी ख्याता हृदयं परिरक्षतु ।।६।।
ऐं ह्रीं श्रीं क्लीं सौः ऐं क्लीं सौः सौः क्लीं ऐं
सौः क्लीं श्रीं ह्रीं ऐं'—
वागादि षोडशी पातु स्तनौ मे सुन्दरीपरा ।।७।।
'क ए श्रीं ह स क ल ह्रीं क्लीं ह स क ह ल ह्रीं
सौः स क ल ह्रीं' नरव (२०)'—
वर्णा पार्श्वौ पात्वपराजिता ।।८।।
'ह्रीं ह् सौं स्हौं ह्रीं' स्हौं ह् सौं क्लीं ह स क ह
ल ह्रीं ह्रीं ह्रीं सौः सौः ह ह स क ह ल ह्रीं
क्लीं ह् सौं स्हौं ह्रीं स्हौं ह् सौ ह्रीं'—
मे सुन्दरीयं समाख्याता महापुरुष पूजिता ।
महागुह्य स्वरूपा च केवलानन्द चिन्मयी ।
एकत्रिंशद्वर्णरूपा कटिदेशं सदावतु ।।९।।
ह स क ल ह्रीं मे पृष्ठं कूटं वाग्भव संज्ञकम् ।
'ह स क ल ह्रीं' कुक्षि काम कूटं सदावतु ।
वक्षस्थलं शक्तिकूटं 'स क ल ह्रीं' मे ।
लोपामुद्रा पञ्चदशी मध्यदेशं सदावतु ।।१०।।

'क ह ए ई ल ह्रीं' नाभि 'ह क ए ई ल ह्रीं कटिम् ।
सक्थिनी मे सदा पातु 'स क ए ई ल ह्रीं' सदा ।
'क ह ए ई ल ह्रीं ह क ए ई ल ह्रीं स क ए ई ल ह्रीं मे ।
मानवी विद्या सर्वतः परिरक्षतु ॥११॥

'स ह क ए ई ल ह्रीं' मे ऊरुयुग्मं सदावतु ।
'स ह क ह ए ई ल ह्रीं' गुह्यं पातु सदामम ।
'ह स क ए ई ल ह्रीं' तु जानुनी पातु मे सदा ।
'स ह ए ई ल ह्रीं स ह क ह ए ई ह्रीं ह स क
ए ई ल ह्रीं' मम—
जलजे भय संघाते सर्वतः परिरक्षतु ॥१२॥

'ह स क ए ई ल ह्रीं मे गुल्फयुग्मं सदायतु ।
'ह स क ह ए ई ल ह्रीं' पादौ पातु सदामम ।
'स ह क ए ई ल ह्रीं' मे प्रपदौमे पातु सर्वदा ।
'ह स क ए ई ल ह्रीं ःह स क ह ए ई ल ह्रीं
स ह क ए ई ल ह्रीं' सदा कुबेरेण प्रपूजिता ॥१३॥

'क ए ई ल ह्रीं' प्राच्यांमां त्रिपुरापरिरक्षतु ।
'ह स ग ह ल ह्रीं' पातु वह्निकोणे निरन्तरम् ।
'स ह स क ल ह्रीं' याम्यांपातु मां सर्वसिद्धिदा ।
'क ए ई ल ह्रीं ह स क ह ल ह्रीं स ह स क ल ह्रीं'
विद्यागस्त्य सेव्या च चक्रस्था मां सदावतु ॥१४॥

'स ए ई ल ह्रीं' च नित्यं नैर्ऋत्यां मां सदावतु ।
'स ह क ह ल ह्रीं' पातु प्रतीच्यां मेद्वितीयकम् ।
'स क ल ह्रीं' पातु वायव्ये सदा मां परिरक्षतु ।
'स ए ई ल ह्रीं स ह क ल ह्रीं स क ल ह्रीं तु ।
नन्द्याराधित विद्येयं सर्वाङ्गं मे सदावतु ॥१५॥

'ह स क ल ह्रीं' वायव्ये 'स ह क ल ह्रीं' उत्तरे ।
'स क ह ल ह्रीं' ईशान्ये सुन्दरीपातु मां सदा ।
'ह स क ल ह्रीं स ह क ल ह्रीं स क ह ल ह्रीं मां ।
ऊर्ध्वं रक्षतु मे नित्यं सूर्यपूज्या महोदया ॥१६॥

'क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं मे ।
सर्वाङ्गंवै शक्रपूज्या सततं परिरक्षतु ॥१७॥

'क ए ई ल ह्रीं ह क ह ल ह्रीं ह स क ल ह्रीं च
ब्रह्माणी मां सदा पायाच्छ्रीमत्त्रिपुरसुन्दरी ।।१८।।

'ह स क ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं च ।
'ह स क ल ह स क ह ल स क ल ह्रीं शाङ्करी ।
चतुष्कूटा महाविद्या पाताले मां सदावतु ।।१६।।

'ह स क ल ह्रीं आधारं ।'
'ह स क ल ह्रीं लिङ्गे ।'
'स क ल ह्रीं पातु नाभि ।'
'स ह क ल ह्रीं हृदये ।'
'स ह क ह ल ह्रीं कण्ठं ।'
'स ह स क ल ह्रीं नाभ्याम् ।'

'ह स क ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं ।
स ह क ल ह्रीं स ह क ल ह्रीं स ह क ल ह्रीं ।
मनोभवा सदापातु रस संख्या महाप्रभा ।
षट्कूटा वैष्णावी विद्या पातु मां सुन्दरीपारा ।।२०।।

'क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं च ।
दुर्वाससा प्रपूज्यां मां दिक्षु विद्या सदावतु ।।२१।।

'क ह ए ई ल ह्रीं ह ल ए ई ल ह्रीं स क ए ई ल ह्रीं ।
क्रोधेन पूजिता देवी विदिक्षु परिरक्षतु ।।२२।।

'ह स क ल ह्रीं ह स क ल ह ल ह्रीं स क ल ह्रीं ।
महाज्ञानमयी विद्या षोडशी मां सदावतु ।।२३।।

'श्रीं ह्रीं क्लीं ऐं सौः ओं ह्रीं श्रीं ऐं क्लीं सौः सौः ऐं
क्लीं ह्रीं श्रीं ।'
सर्वाङ्ग मे सदा पातु बीजरूपा च षोडशी ।।२४।।

मतान्तरे :

श्रीं ह्रीं क्लीं ऐं सौः ओं ह्रीं श्रीं क ए ई ल ह्रीं
ह स क ह ल ह्रीं स क ल ह्रीं सौः ऐं क्लीं ह्रीं श्रीं ।
सर्वाङ्गं मे सदा पातु पूर्णरूपा तु षोडशी ।।२५।।

'ओं क्लीं ह्रीं श्रीं ऐं क्लीं सौः क ए ई ल ह्रीं ह स
क ह ल ह्रीं स क ल ह्रीं स्त्रीं ऐं क्रों क्रीं ई हुं महादेवी ।
श्री महाषोडशी पूर्णा प्रथिता भुवनत्रये ।

ज्ञानेन मृत्युशमनी शिरस्था सर्वतोऽवतु ।
श्री महाषोडशी पूर्णा महादेवेन पूजिता ।
यस्या विज्ञान मात्रेण मृत्योर्मृत्युभवेत्स्वयम् ॥२६॥

ऐं क ए ई ल ह्रीं क्लीं ह स क ह ल ह्रीं सौः स क
ल ह्रीं सोहं हों हं सः ह्रीं स क ल ह्रीं सौः ह स क ह
ल ह्रीं क्लीं क ए ई ल ह्रीं ऐं ब्रह्मस्वरूपिणी ।
अष्टादशाक्षरी विद्या परमानन्दचिद्घना ।
नेत्र वेदा (४२) त्मकैर्वर्णयुता मां सर्वतोऽवतु ॥२७॥

इतिते कथितं देवि ब्रह्मविद्या कलेवरम् ।
त्रैलोक्य मोहनं नाम कवचं ब्रह्मरूपकम् ॥

सप्तकोटि महाविद्या तन्त्रेषु कथिताः प्रिये ।
तासां सारात्सारतरा याश्च विद्याः सुगोपिताः ॥

बहुनात्रकिमुक्तेन श्रीमहाषोडशीपरा ।
प्रकाशिता मयादेवि यां प्रच्छसि पुनः पुनः ॥

महाविद्यामयं ब्रह्म कवचं मन्मुखोदितम् ।
गुरुमभ्यर्च्य विधिवत्पुरश्चर्यां समाचरेत् ॥

अष्टोत्तर शतं जप्त्वा दशांशं हवनादिकम् ।
ततः सुप्रसिद्धकवचः पुण्यात्मामदनोपमः ॥

मन्त्रसिद्धिर्भवेत्तस्य पुनश्चर्यां विना ततः ।
वक्त्रे तस्य वसेद्वाणी कमला निश्चला गृहे ॥

पुष्पाञ्जल्यष्टकं दत्त्वा मूलेनैव पठेत्सकृत् ।
दशवर्षं सहस्राणां पूजायाः फलमाप्नुयात् ॥

आत्मानं तन्मयं कृत्वा यः पठेत्कवचं परम् ।
यं यं पश्यति वै शीघ्रं तस्यदासो भवेद्ध्रुवम् ॥

विलिख्य भूर्जेघुटिकां स्वर्णस्थां धारयेद्यदि ।
कण्ठे वा यदि वा बाहौ सकुर्याद्दासवज्जगत् ॥

त्रिलोकीं क्षोभयत्येव त्रैलोक्य विजयी भवेत् ।
तद्गात्रं प्राप्य शस्त्राणि महास्त्रादीनिपार्वति ॥

माल्यानि कुसुमानीव सुखदानि भवन्ति हि ।
इदं कवचमज्ञात्वा यो जपेत्सुन्दरीं पराम् ॥

नवलक्षं प्रजप्त्वापि तस्य विद्या न सिध्यति ।
सशस्त्र घातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ।।
इदमेवपरं यस्माद् भुक्ति मुक्ति प्रदायकम् ।
तस्मात्सर्वं प्रयत्नेन पठनीयं मुमुक्षुभिः ।।
भूवेश्मगत्रिवृत षोडश नागशक्र-
दिग्युग्मवस्वनलकोणगबिन्दु मध्ये ।
सिंहासनोपरिगतारक पीठ मध्ये ।
प्रोत्फुल्लपद्मनिलयां त्रिपुरांभजेऽहम् ।।
इति रुद्रयामले गौरीश्वर सम्वादे
श्री राजराजेश्वरी श्रीमहात्रिपुर
सुन्दर्यास्त्रैलोक्य मोहनाख्य कवचम् ।।

नौवाँ अध्याय

सौन्दर्य लहरी

(पूर्वार्द्ध)

(१)

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वाराध्यां हरिहरविरञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ।।

(२)

तनीयांसं पांसुं तव चरणपंकेरुहभवं
विरिञ्चिः संचिन्वन्विरचयति लोकानविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिम् ।।

(३)

अविद्यानामन्तस्तिमिरमिहिरोद्दीपनकरी
जडानां चैतन्यस्तबकमकरन्दस्रुतिझरी ।
दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती ।।

(४)

त्वदन्यः पाणिभ्यामभयवरदो दैवतगण-
स्त्वमेका नैवासि प्रकटितवराभीत्यभिनया ।
भयात्त्रातुं दातुं फलमपि च वाञ्छासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ ।।

(५)

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ।
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ।।

(६)

धनुः पौष्पं मौर्वी मधुकरमयी पञ्चविशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाऽप्येकः सर्वं हिमगिरिसुते ! कामपि कृपा-
मपाङ्गात्ते लब्ध्वा जगदिद (न) मनङ्गो विजयते ।।

(७)

क्वणत्काञ्चीदामा करिकलभकुम्भस्तनभरा (भता)
परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना ।
धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुराहो पुरुषिका ।।

(८)

सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाऽऽकारे मञ्चे परमशिवपर्यङ्क निलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ।।

(९)

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसि ।।

(१०)

सुधाधाराऽऽसारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नाय महसा ।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्ट वलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणी ।।

(११)

चतुर्भिः श्रीकण्ठैः शिवयुतिभिः पञ्चभिरपि
प्रभिन्नाभिः शम्भोर्नवभिरपि मूलप्रकृतिभिः ।

त्र्यश्चत्वारिंशद्वसुदलकलाश्र (श्च) त्रिवलय-
त्रिरेखाभिः सार्धं तव शरण (भवन) कोणाः परिणताः ॥

(१२)

त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितु
कवीन्द्रा कल्पन्ते कथमपि विरिञ्चिप्रभृतयः ।
यदालोकौत्सुक्यादमरललना यान्ति मनसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीम् ॥

(१३)

नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापाङ्गालोके पतितमनुधावन्ति शतशः ।
गलद्वेणीबिन्धाः कुचकलशविस्रस्तसिचया
हठात्त्रुट्यत्काञ्च्यो विगलितदुकूला युवतयः ॥

(१४)

क्षितौ षट्पञ्चाशद्विसमधिकपञ्चाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपंचाशदनिले ।
दिवि द्विषट्त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पदाम्बुजयुगम् ॥

(१५)

शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां
वरत्रासत्राणस्फटिकघुटि (णि) कापुस्तक कराम् ।
सकृन्न त्वां नत्वा कथमिव सतां सन्निदधते
मधुक्षीरद्राक्षामधुरिमधुरिणा भणितयः ॥

(१६)

कवीन्द्राणां चेतः कमलवनबालातपरुचिम्
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम् ।
विरिञ्चिप्रेयस्यास्तरुणतर शृङ्गारलहरी-
गभीरावाभिर्वाग्भिर्विदधति सतां (भां) रंजनमयी ॥

(१७)

सावित्रिभिर्वाचां शशिमणिशिलाभङ्गरुचिभि-
र्वशिन्याद्याभिस्त्वां सह जननि सञ्चिन्तयति यः ।
स कर्ता काव्यानां भवति महतां भङ्गि सुभगै (रुचिभि)-
र्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥

(१८)

तनूच्छायाभिस्ते तरुणतरणिश्रीध (स) रणिभि-
दिवं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः ।
भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः
सहोर्वश्या वश्याः कतिकति न गीर्वाणगणिकाः ॥

(१९)

मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो
ह (का) रार्धं ध्यायेद्यो हरमहिषिते मन्मथकलाम् ।
स सद्यः संक्षोभं नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ॥

(२०)

किरन्तीमङ्गेभ्यः किरणनिकुरुम्बामृतरसं
हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः ।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाऽऽधा (सा) रसिरया ॥

(२१)

तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीम्
निषण्णां षण्णामप्युपरि कमलानां तव कलाम् ।
महापद्माटव्यां मृदितमलमायेन मनसा
महान्तः पश्यन्ती दधति परमाह्लादलहरीम् ॥

(२२)

भवानि त्वं दासे मयि वितर दृष्टिं सकरुणा-
मिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम् ॥

(२३)

त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्द्धं शम्भोरपरमपि शङ्के हृतमभूत ।
यदेत (तथाहि) त्त्वद्रूपं सकलमरुणाभ त्रिनयनं
कुचाभ्यामानभ्र कुटिलशशिचूडालमुकुटम् ॥

(२४)

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत्स्वमपि वपुरीशः स्थगयति (स्थिरयति) ।

सदा पूर्वः सर्वं तदिदमनु गृह्णाति च शिव-
स्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः ॥

(२५)

त्रयाणां देवानां त्रिगुणजनितानां तव शिवे
भवेत्पूजा पूजा तव चरणयोर्या विरचिता।
तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलित करोत्तं समुकुटाः ॥

(२६)

विरञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम्।
वितन्द्राः माहेन्द्री विततिरपि संमीलति दृषां
महासंहारेऽस्मिन्विहरति सति त्वत्पतिरसौ ॥

(२७)

जपो जल्पः शिल्पं सकलमपि मुद्राविरचनं
गतिः प्रादक्षिण्यं भ्रमणमशनाद्याहुतिविधिः।
प्रणामः संवेशः सुखमखिलमात्मार्पणदशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥

(२८)

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः।
करालं यत्क्ष्वेलं (डं) कवलितवतः कालकलना
न शम्भोस्तन्मूलं तव जननि ताटङ्क महिमा ॥

(२९)

किरीटं वैरिञ्च्यं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहिजम्भा रिमुकुटम्।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥

(३०)

स्वदेहोद्भूताभिर्घृणिभिरणिमाऽऽद्याभिरभितो
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः।
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतौ
महासंवर्ताग्निर्विरचयति नीराजनविधिम् ॥

(३१)

चतुःषष्ठ्या तन्त्रैः सकलमिति (भि) संधाय भुवनं
स्थितस्तत्तत्सिद्धि प्रसवपरतन्त्रैः पशुपतिः ।
पुनस्त्वन्निर्वन्धादखिलपुरुषार्थैकघटना-
स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम् ॥

(३२)

शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामारहरयः ।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥

(३३)

स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो-
र्निधायैके नित्ये निरवधिमहाभोगरसिकाः ।
भजन्ति त्वां चिन्तामणिगुणनिवद्धाक्षव (र) लयाः
शिवाऽग्नौ जुह्वन्तः सुरभिघृतधाराऽऽहुतिशतः ॥

(३४)

शरीरं त्वं शम्भोः शशिमिहिरवक्षोरुहयुगं
तवात्मानं मन्ये भगवति नवा (भवा) त्मानमनघम् ।
अतः शेषः शेषीत्ययमुभयसाधारणतया
स्थितः सम्बन्धो वां समरस परमानन्दपरयोः ॥

(३५)

मनस्त्वं व्योमस्त्वं मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं भूमिस्त्वयि परिणतायां नहि परम ।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारैं शिवयुवति भावेन विभृषे ॥

(३६)

तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं
परं शम्भुं वन्दे परिमिलितपार्श्वे परचिता ।
यमाराध्यन् भक्त्या रविशशिशुचीनामविषये
निरालोके लोके निवसति हि भालोक भ (भु) वने ॥

(३७)

विशुद्धौ ते शुद्धस्फटिक विशदं व्योमजनकं
शिवं सेवे देवीमपि शिवसमानव्यवसिताम् ।

ययोः कान्त्यायान्त्या शशिकिरण सारूप्य सरणिं
विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ॥

(३८)

समुन्मीलत्संवित्कमलमकरन्दैकरसिकं
भजे हंस द्वन्द्वं किमपि महतां मानसचरम् ।
यदालापादष्टादशगुणितविद्यापरिणति-
र्यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव ॥

(३९)

तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं
तमीडे संवर्तं जननि महतीं तां च समयाम् ।
यदालोके लोकान् दहति महति क्रोधकलिते
दयार्द्रा (भिर्द्रंग्भिः) या दृष्टिः शिशिरमुपचारं रचयति ॥

(४०)

तडित्वन्तं शक्त्या तिमिरपरिपन्थस्फुरणया
स्फुरन्नाना रत्नाभरणपरिणद्धेन्द्र धनुषम् ।
तव (तमः) श्याम मेघं कमपि मणिपूरैकशरणं
निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनम् ॥

(४१)

तवाधारे मूले सह समयया लास्यपरया
शिवा (नवा) त्मानं मन्ये नवरस महाताण्डवनटम् ।
उमाभ्यामेताभ्यामुद (भ) य विधिमुद्दिश्य दययां
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदम् ॥

(उत्तरार्द्ध)

(४२)

गतैर्माणिक्यत्वं गगनमणिभिः सान्द्रघटित
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।
स नीडेयच्छायाच्छुरणशबल चन्द्रशकलं
धनुः शौनासीरं किमिति न निबध्नाति धिषणाम् ॥

(४३)

धनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं
घनस्निग्धं श्लक्ष्णं चिकुरनिकुरुम्बं तव शिवे ।

यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो
वसन्त्यस्मिन्मन्ये बलमथनवाटीविटपिनाम् ॥

(४४)

वहन्ती सिन्दूरं प्रबलकबरीभारतिमिर-
द्विषां वृन्दैर्वन्दीकृतमिव नवीनार्क किरणम् ।
तनोतुक्षेमं नस्तव वदनसौन्दर्यलहरी
परिवाहः स्रोतः सरणिखि सीमान्तसरणिः ॥

(४५)

अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुह रुचिम् ।
दरस्मेरे यस्मिन्दशनरुचि किञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मरदहनचक्षुर्मधुलिहः ॥

(४६)

ललाट लावण्यद्यु तिविमलमाभाति तव यद्
द्वितीयं तन्मन्ये मुकुट घटितं चन्द्रशकलम् ।
विपर्यान्यासादुभयमपि सम्भूय च मिथः
सुधालेपस्यूतिः परिणमति राकाहिमकरः ॥

(४७)

भ्रुवौ भुग्ने किञ्चिद् भुवनभयभङ्गव्यसनिनि
त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणम् ।
धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः
प्रकोष्टे मुष्टौ च स्थगयति निगूढान्तरमुमे ॥

(४८)

अहः सूते सव्यं तव नवनमर्कात्मकतया
त्रियामां वामं ते सृजति रजनीनायकतया ।
तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः
समाधत्ते सन्ध्यां दिवसनिशयोरन्तरचरीम् ॥

(४९)

विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः
कृपाधारा धारा किमपि मधुरा भोगवतिका ।
भवन्ती दृष्टिस्ते बहुनगर विस्तार विजया
ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते ॥

(५०)

कवीनां सन्दर्भस्तवकमकरन्दैकरसिकं
कटाक्षव्याक्षेपभ्र मर कलभौ कर्णयुगलम् ।
अमुञ्चन्तौ दृष्टवा तव नवरसास्वादतरला-
बसूयासंसर्गादलिकनयनं किञ्चिदरुणम् ।।

(५१)

शिवे श्रृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा ,गङ्गायां गिरिश्चरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुह सौभाग्यजयिनी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ।।

(५२

गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तश्चित्तप्रशमरसविद्रावणफले ।
इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके
तवाकर्णाकृष्टस्मरशरविलासं कलयतः ।।

(५३)

विभक्तत्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया
विभाति त्वन्नेत्रत्रितयमिदमीशानयिते ।
पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरतान्
रजः सत्त्वं विभ्रत्तम इति गुणानां त्रयमिव ।।

(५४)

पवित्री कर्तुं नः पशुपतिपराधीन हृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ।
नदः शोणो गङ्गा तपनतनयेति ध्रुवममु (मयं)
त्रयाणां तीर्थानामुपनयसि सम्भेदमनघम् ।।

(५५)

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधरराजन्यतनये ।
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ।।

(५६)

तवापर्णे कर्णे जपनयनपैशुन्यचकिता
निलीयन्ते तोये नियतमनिमेषाः शफरिकाः ।

इयं च श्रीर्बद्धच्छदपुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥

(५७)

दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति न च हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥

(५८)

अरालं ते पाली युगलमगराजन्यतनये
न केषामाधत्ते कुसुमशरकोदण्डकुतुकम् ।
तिरश्चीनो यत्र श्रवणपथमुल्लध्य विलसन्न
पाङ्गव्यासङ्गो दिशति शरसन्धानधिषणाम् ॥

(५९)

स्फुरद्गण्डाभोग प्रतिफलितताटङ्कयुगलं
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम् ।
यमारुह्य (यमाश्रित्य) द्रुह्यत्यवनिरथमर्केन्दुचरण
महावीरो मारः प्रमथपतये सज्जितवते ॥

(६०)

सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः
पिबन्त्याः शर्वाणि श्रवणचुलुकाभ्यामविरलम् ।
चमत्कारश्लाघाचलितशिरसः कुण्डलगणो
झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ॥

(६१)

असौ नासावंशस्तुहिनगिरिवंशध्वजपटि (पटे)
त्वदीयो नेदोयः फलतु फलमस्माकमुचितम् ।
वहन्नन्तर्मुक्ताः शिशिरतर निश्वासघटिताः (गलिताः)
समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः ॥

(६२)

प्रकृत्याऽऽरक्तायास्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता ।
न विम्बं तद्बिम्बप्रतिफलनरागादरुणितं
तुलामध्यारोढुं कथमिव न लज्जेत् कलया ॥

(६३)

स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिबतां
चकोराणामासीदत्तिरसतया चञ्चुजडिमा ।
अतस्ते शीतांशोरमृतलहरीमाम्लरुचयः
पिबन्ति स्वच्छन्दं निशनिश भृशं काञ्जिकधिया ॥

(६४)

अविश्रान्तं पत्युर्गुणगणकथाऽऽम्रेडनजपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा ।
यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ॥

(६५)

रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभि-
र्निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः ।
विशाखेन्द्रोपेन्द्रैः शशिविशदकर्पूरशकला
विलीयन्ते मातस्तव वदनताम्बूलकवलाः ॥

(६६)

विपञ्चया गायन्ती विविधमपदानं पशुपते-
स्त्वयाऽऽरब्धे वक्तुं चलितशिरसा साधुवचने ।
तदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम् ॥

(६७)

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया ।
करग्राह्यं शम्भोर्मुखमुकुरवृन्त गिरिसुते
कथंकारं ब्रूमस्त्रव चिबुकमौपम्यरहितम् ॥

(६८)

भुजाश्लोषान्नित्यं पुरदमयितुः कण्टकवती
तव ग्रीवा धत्ते मुखकमलनालश्रियमियम् ।
स्वतः श्वेता कालागरुबहुलजम्बालमलिना
मृणालीलालित्यं वहति यदधो हारलतिका ॥

(६९)

गले रेखास्तिस्त्रो गतिगमकगीतैकनिपुणे
विवाहव्यानद्धप्रगुणगुणसंख्याप्रतिभुवः ।

विराजन्ते नानाविधमधुररागाकरभुवां
त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते ।।

(७०)

मृणाली मृद्वीनां तव भुजलतानाञ्चत सृणां
चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः
नखेभ्यः संत्रस्यन्प्रथममथनादन्धरिपो-
श्चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया ।।

(७१)

नखानामुद्योतैर्नवनलिनरागं विहसतां
कराणां ते कान्ति कथय कथयामः कथमुमे ।
कयाचिद्वा साम्यं भवतु कलया हन्त कमलं
यदि क्रीडल्लक्ष्मीचरणतलक्षाऽरुणदलम् ।।

(७२)

समं देवि स्कन्दद्विपवदनपीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्नुतमुखम् ।।
यदालोक्याशङ्काऽऽकुलितहृदयो हास जनकः
स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झटिति ।।

(७३)

अमू ते वक्षोजावमृतरसमाणिक्यकुतुपौ (कलशौ)
न सन्देहस्पन्दो नगपतिपताके मनसि नः ।
पिबन्तौ तौ यस्मादविदितवधूसङ्गमरसौ
कुमारावद्यापि द्विरदवदनक्रौञ्चदलनौ ।।

(७४)

वहत्यम्ब स्तम्बेरमदनुजकुम्भप्रकृतिभिः
समारब्धां मुक्तामणिभिरमलां हारलतिकाम् ।
कुचाभागो बिम्बाधररुचिभिरन्तः शबलितां
प्रतापव्यामिश्रां पुरदमयितुः कीर्तिमिव ते ।।

(७५)

तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयः पारावारः परिवहति सारस्वतमिव ।
दयावत्या दत्त द्रविडशिशुरस्वाद्य तव यत्
कवीनां प्रौढानामजनिकमनीयः कवयिता ।।

(७६)

हरक्रोधज्वालाऽवलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसङ्गो मनसिजः।
समुत्तस्थो तस्मादचलतनये धूमलतिका
जनस्तां जानीते तव जननि रोमावलिरिति ।।

(७७)

यदेतत्कालिन्दीतनुतरतरङ्गाकृति शिवे
कृशेमध्ये किञ्चिज्जननि तव तद्भाति सुधियाम्।
विमर्दादन्योऽन्यं कुचकलशयोरन्तरगतं
तनुभूतं व्योम प्रविशदिव नाभिं कुहरणीम ।।

(७८)

स्थिरो गङ्गाऽऽवर्तं स्तनमुकुलरोमावलिलता-
निजाबालं कुण्डं कुसुमशरतेजोहुतभुजः।
रतेर्लीलाऽगारं किमपि तव नाभिर्गिरिसुते
बिलद्वारं सिद्धे र्गिरिशनयनानां विजयते ।।

(७९)

निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्तेर्नाभौ वलिषु च शनैस्त्रुट्यत इव।
चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं शैलतनये ।।

(८०)

कुचौ सद्यः स्विद्यतटघटितकूर्पासभिदुरौ
कषन्तौ दोर्मूले कनककलशाभौ कलयता।
तव त्रातुं भङ्गादलमिति वलग्नं तनुभुवा
त्रिधानद्धं देवि त्रिवलिलवलीवल्लिभिरिव ।।

(८१)

गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजात्
नितम्बादाच्छिद्य त्वयि हरणरूपेण निदधे।
अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं
नितम्बप्राग्भारः स्थगयति लघुत्वं नयति च ।।

(८२)

करीन्द्राणां शुण्डान् कनककदलीकाण्डपटली-
मुभाभ्यामुरुभ्यामुभयमपि निर्जित्य भवती।

सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते
विजिग्ये जानुभ्यां विबुधकरिकुम्भद्वयमपि ।।

(८३)

पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
निषङ्गौ जङ्घे ते विषमविशिखो वाढमकृत ।
यदग्रे दृश्यन्ते दशशरफलाः पादयुगली-
नखाग्रच्छद्मानः सुरमुकुटशाणैकनिशिताः ।।

(८४)

श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः शिरसि दयया धेहि चरणौ ।
ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूड़ामणिरुचिः ।।

(८५)

नमोवाकं ब्रूमो नयनरमणीयाय पदयो-
स्तवास्मै द्वन्द्वाय स्फुटरुचिरसालक्तकवते ।
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
पशूनामीशानः प्रमदवनकङ्केलितरवे ।।

(८६)

मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमित
ललाटे भर्तारं चरणकमले ताडयति ते ।
चिरादन्तः शल्यं दहनकृतमुन्मूलितवता
तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा ।।

(८७)

हिमानीहन्तव्यं हिमगिरिनिवसैक चतुरौ
निशायां निद्राणं निशि च पर भागे च विशदौ ।
परं लक्ष्मी पात्रं श्रियमतिसृजन्तो समयिनां
सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किम् ।।

(८८)

पदं ते कीर्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिनकमठीखर्परतुलाम् ।
कथंचिद्बाहुभ्यामुपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ।।

(८९)

नखैनकिस्त्रीणां करकमलसङ्कोच शशिभि-
स्तरूणां दिव्यानां हसत इव ते चण्डि चरणौ।
फलानि स्वः स्थेभ्यः किसलयकराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ॥

(९०)

ददाने दीनेभ्यः श्रियमनिशमाशाऽनुसदृशी-
ममन्दं सौन्दर्यप्रकरमकरन्दं विकिरति।
तवास्मिन्मन्दारस्तवकसुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरणः षट्चरणताम्॥

(९१)

पदन्यासक्रीडापरिचयमिवारब्धुमनस-
श्चरन्तस्ते खेलं भवनकलहंसा न जहति।
अतस्तेषां शिक्षां सुभगमणिमञ्जीररणित-
च्छलादाचक्षाणं चरण कमलं चारुचरिते॥

(९२)

गतास्ते मञ्चत्वं द्रुहिणहरिरुद्रेश्वरभृतः
शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः।
त्वदीयानां भासां प्रतिफलनरागारुणतया
शरीरी श्रृङ्गारो रस इव दृशां दोग्धि कुतुकम्॥

(९३)

अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा गात्रे दृषदिव कठोरा कुचतटे।
भृशंतन्वी मध्ये पृथुरपि वरारोहविषये
जगत् त्रातुं शम्भोर्जयति करुणा काचिदरुणा॥

(९४)

समानोतः पद्भ्यां मणिमुकुरतामम्बरमणि-
र्भयादास्यादन्तः स्तिमितकिरणश्रेणिमसृणः।
दधाति त्वद्वक्त्रप्रतिफलनमश्रान्तविकचं
निरातङ्कं चन्द्रान्निजहृदयपङ्केरुहमिव॥

(९५)

कलङ्कः कस्तूरी रजनिकरबिम्बं जलमयं
कलाभिः कर्पूरैर्मरकतकरण्डं निविडतम्।

अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहर
विधिर्भूयो भूयो निविडयति नूनं तव कृते ॥

(९६)

पुरारातेरन्तः पुरमसि ततस्त्वच्चरणयोः
सपर्यामर्यादा तरलकरणानामसुलभा ।
तथाह्येते नीताः शतमखमुखाः सिद्धिमतुलां
तव द्वारोपान्जस्थितिभिरणिमाऽऽद्याभिरमराः ॥

(९७)

कलत्र वैधात्रं कतिकति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः ।
महादेवं हित्त्वा तव सति सतीनामचरमे
कुचाभ्यामासङ्गः कुखकतरोरप्यसुलभः ॥

(९८)

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नि पद्मां हरसहचरीमद्रितनयाम् ।
तुरीया काऽपि त्वं दुरधिगम निः सीममहिमा
महामाया विश्वं भ्रमयसि परब्रह्ममहिषि ॥

(९९)

समुद्भूतस्थलस्तनभरमुरश्चारु‌हसितं
कटाक्षे कन्दर्पो कतिचन कदम्बद्युतिवपुः ।
हरस्य त्वद्भ्रान्ति मनसि जनयसिस्म विमला
भवत्या ये भक्ताः परिणतिरमोषामिय मुमे ॥

(१००)

कदा काले मातः कथय कलितालक्तकरसं
पिवेयं विद्यार्थी तव चरणनिर्णेजनजलम् ।
प्रकृत्या मूकानामपि च कविताकारणतया
यदाधत्ते वाणी मुखकमलताम्बूलरसताम् ॥

(१०१)

सरस्वत्या लक्ष्म्या विधि हरि सपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरञ्जीवन्नेव क्षपितपशुपाशव्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वद्भजनवान् ॥

(१०२)

निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे
निराधाटज्ञाने नियमपरचित्तैकनिलये ।
नियत्यानिर्मुक्ते निखिलनिगमान्तस्तुतपदे
निरातङ्के नित्ये निगमय ममापि स्तुतिमिमाम् ॥

(१०३)

प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासुतेश्चन्द्रोपलजललवैरर्घ्यरचना ।
स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम् ॥

दसवाँ अध्याय

अथ भावनोपनिषत्

श्रीगुरुः सर्वकारण भूता शक्तिः ॥१॥

तेन नवरन्ध्ररूपो देहः ॥२॥

नवचक्ररूपं श्रीचक्रम् ॥३॥

वाराही पितृरूपा कुरुकुल्लाबलि देवता माता ॥४॥

पुरुषार्थास्सागराः ॥५॥

देहो नवरत्नद्वीपः ॥६॥

त्वगादिसप्तधातुरोमसंयुक्तः ॥७॥

सङ्कल्पाः कल्पतरवस्तेजः कल्पकोद्यानम् ॥८॥

रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसाः षड्टतवः ॥९॥

ज्ञनमर्घ्यं ज्ञेयं हविः ज्ञाता होता ज्ञातृज्ञानज्ञेयानामभेद-
भावनम् श्रीचक्रपूजनम् ॥१०॥

नियतिः शृङ्गारादयो रसा अणिमादयः।
कामक्रोधलोभमोहमदमात्सर्यपुण्यपापमय्यो
ब्राह्म्याद्यष्टशक्तयः ॥११॥

आधारनवकं मुद्राशक्तयः ॥१२॥

पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राण-
वाक्पादपाणिपायूपस्थानि मनोविकारः कामा-
कर्षिण्यादिषोऽशशक्तयः ॥१३॥

वचनादानगमनविसर्गानन्दहानोपादानोपेक्षा-
ख्यबुद्धयोऽनङ्गकुसुमाद्यष्टौ ॥१४॥

अलम्बुसा कुहूर्विश्वोदरा वारणा हस्तिजिह्वा यशोवती पयस्विनी गान्धारी पूषा शङ्खिनी सरस्वती इडा पिङ्गला सुषुम्ना चेति चतुर्दश नाड्यः सर्वसंक्षोभिण्यादिचतुर्दश शक्तयः ॥१५॥

प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनञ्जयाः दश वायवस्सर्वसिद्धिप्रदादिबहिर्दशारदेवताः ॥१६॥

एतद्वायुसंसर्गकोपाधिभेदेन रोचकः पाचकः शोषको दाहकः प्लावकः इति प्राणमुख्यत्वेन पञ्चधा जठराग्निर्भवति ॥१७॥

क्षारक उद्गारकः क्षोभको जृम्भको मोहक इति नागप्राधान्येन पञ्चविधास्ते मनुष्याणां देहगाः भक्ष्य भोज्यचोष्यलेह्यपेयात्मकं पञ्चविध मन्नं पाचयन्ति ॥१८॥

एता दश वह्निकलाः सर्वज्ञाद्या अन्तर्दशारगा देवताः ॥१९॥

शीतोष्णसुखदुःखेच्छाः सत्त्वरजस्तमोगुणाः वशिन्यादिशक्तयोऽष्टौ ॥२०॥

शब्दादितन्मात्राः पञ्चपुष्पबाणाः ॥२१॥

मन इक्षुधनुः ॥२२॥

रागः पाशः ॥२३॥

द्वेषोऽङ्कुशः ॥२४॥

अव्यक्तमहदहङ्काराः कामेश्वरीभगमालिन्योऽन्तस्त्रिकोणगा देवताः ॥२५॥

निरुपाधिका संविदेव कामेश्वरः ॥२६॥

सदानन्दपूर्णा स्वात्मैव परदेवता ललिता ॥२७॥

लौहित्यमेतस्य सर्वस्य विमर्शः ॥२८॥

अनन्यचित्तत्वेन च सिद्धिः ॥२९॥

भावनायाः क्रिया उपचाराः ॥३०॥

अहं त्वमस्ति नास्ति कर्त्तव्यमकर्त्तव्यमुपासितव्यमिति विकल्पानामात्मनि विलापनं होमः ॥३१॥

भावना विषयाणामभेदभावना तर्पणाम् ॥३२॥

पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनं पञ्चदश नित्याः ॥३३॥

एवं मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावनापरो जीवन्मुक्तो भवति स एव शिवयोगीति गद्यते ॥३४॥

कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः ॥३५॥

य एवं वेद सोऽथर्वशिरोऽधीते ॥३६॥

श्रीदेवीस्तोत्रपञ्चकम्

(१) लघुस्तुतिः

ऐन्द्रस्येव शरासनस्य दधती मध्ये ललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोस्सदाहस्थितात्
छिन्द्यान्नस्सहसा पदैस्त्रिभिरघ ज्योतिर्मयी वाङ्मयी ॥१॥

या मात्रा त्रपुसीलतातनुलसत्तन्तुस्थितिस्पर्धिनी
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ।
शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमाः
ज्ञात्वेत्थं न पुनस्स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः ॥२॥

दृष्ट्वा सम्भ्रमकारि वस्तु सहता ऐ ऐ इति व्याहृतं
येनाकूतवशादपीह वरदे ! बिन्दुं विनाप्यक्षरम् ।
तस्यापि ध्रुवमेव देवि ! तरसा जाते तवानुग्रहे
वाचस्सूक्ति सुधार सद्रवमुचो निर्यान्ति वक्त्राम्बुजात् ॥३॥

यन्नित्ये ! तव कामराजपरं मन्त्राक्षरं निष्कलं
तस्सारस्वतमित्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ।
आख्यानं प्रतिपर्वं सत्यतपसो यत्कीर्तयन्तो द्विजाः
प्रारम्भे प्रणवास्पदप्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥४॥

यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैः
तार्तीयं तदहं नमामि मनसा त्वद्बीजभिन्दुप्रभम् ।
अस्त्यौर्वोऽपि सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये
गोशब्दो गिरि वर्तते सुनियतं योगं विना सिद्धिदः ॥५॥

एकैकं तव देवि ! बीजमनघं सव्यञ्जनाव्यञ्जनं
कूटस्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं
जप्तं वा सफलीकरोति सततं तं तं समस्तं नृणाम् ॥६॥

वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदान पेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।
उज्जृभाम्बुजपत्रकान्तनयनस्निग्धप्रभालोकिनीं
ये त्वामम्ब ! न शीलयन्ति मनसा तेषां कवित्वंकुतः ॥७॥

ये त्वां पाण्डुरपुण्डरीकपटलस्पष्टाभिराम प्रभां
सिञ्चन्तीममृतद्रवैरिव शिरोध्यायन्तिमूर्ध्नि स्थिताम् ।
अश्रान्ता विकटस्फुटाक्षरपदा निर्याति वक्त्राम्बुजात्
तेषां भारति ! भारती सुरसरित्कल्लोललोलोर्मिवत् ॥८॥
ये सिन्दूरपरागपिञ्जंपिहितां त्वत्तेजसाऽद्या मिमां
उर्वी चापि विलीनयावकरसप्रस्तारमग्नामिव ।
पश्यन्ति क्षणमप्यनन्यमनसस्तेषामनङ्गज्वर-
ल्कान्तस्त्रस्तकुरङ्गशावकदृशो वश्या भवन्ति स्फुटम् ॥६॥
चञ्चत्काञ्चनकुण्डलाङ्गदधरामाबद्धकाञ्चीस्रजं
ये त्वां चेतसि तन्दते क्षणमपि ध्यायन्ति कृत्वा स्थिराम् ।
तेषां वेश्मसु विभ्रमादहरहः स्फारीभवन्त्यश्चिरं
माद्यत्कुञ्जरकर्णतालतरलाः स्थैर्यं भजन्ते श्रियः ॥१०॥
आर्मट्या शशिखण्डमण्डितजटाजूटां नृमुण्डस्रजं
बन्धूकप्रसवारुणाम्बरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामापीनतुङ्ग स्तनीं
मध्ये निम्नवलित्रयाङ्किततनुं त्वद्रूपसंवित्तये ॥११॥
जातोऽप्यल्पपरिच्छदे क्षितिभुजां सामान्यमात्रे कुले
निश्शेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ।
यद्विद्याधरबृन्दवन्दितपदश्श्रीवत्सराजोऽभवत्
देवि ! त्वच्चरणाम्बुजप्रणतिजः सोऽयं प्रसादोदयः ॥१२॥
चण्डि ! त्वच्चरणाम्बुजार्चनकृते बिल्वादिलोल्लुण्ठन-
त्रुट्यत्कण्टककोटिभिः परिचयं येषां न जग्मुः कराः ।
ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्समत्स्याङ्कितैः
जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥१३॥
विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैः
त्वां देवि ! त्रिपुरे ? परापरमयीं सन्तर्प्य पूजाविधौ ।
यां यां प्रार्थयते मनः स्थिरधियां तेषां त एव ध्रुवं
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नी कृता ॥१४॥
शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे
त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति स्फुटम् ।
लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
स त्वं काचिदचिन्त्यरूपमहिमा शक्तिः परा गीयसे ॥१५॥

देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिः स्वराः
त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रिब्रह्म वर्णास्त्रयः।
यत्किञ्चिज्जगति त्रिधा नियमित वस्तु त्रिवर्गादिकं
तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥१६॥
लक्ष्मीं राजकुले जयां रणभुवि क्षेमङ्करीमध्वनि
क्रव्याददिविपसर्पभाजि शबरीं कान्तारदुर्गे गिरौ।
भूतप्रेतपिशाचजम्बुकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे ॥१७॥
माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी।
शक्तिशङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि ॥१८॥
आईपल्लवितैः परस्परयुतैर्द्वित्रक्रमाद्यक्षरै
काद्यैः क्षान्तगतैस्स्वरादिभिरथ क्षान्तैश्च तैस्सस्वरैः।
नामानि त्रिपुरे भवन्ति खलु यान्यत्यगुह्यानि ते
तेभ्यो भैरवपत्नि! विंशतिसहस्रेभ्यः परेभ्यो नमः ॥१९॥
बोद्धव्या निपुणं बुधैस्स्तुतिरियं कृत्वा मनस्तद्गतं
भारत्यास्त्रिपुरेत्यनन्यमनसा यत्राद्यवृत्ते स्फुटम्।
एकद्वित्रिपदक्रमेण कथितस्तत्पादसङ्ख्याक्षरैः
मन्त्रोद्धार विधिर्विशेषसहितस्ससत्सम्प्रदायान्वितः ॥२०॥
सावद्यं निरवद्यमस्तु यदिवा किं वानया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि।
सञ्चिन्त्यापि लघुत्वमात्मनि दृढं सञ्जायमान हठात्
त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम् ॥२१॥

(२) चर्चास्तवः

सौन्दर्यविभ्रमभुवो भुवनाधिपत्य-
सङ्कल्पकल्पतरवस्त्रिपुरे! जयन्ति!
एते कवित्वकुमुदप्रकरावबोध-
पूर्णेन्दवस्त्वयि जगज्जननि! प्रणामाः ॥१॥
देवि! स्तुतिव्यतिकरे कृतबुद्धयस्ते
वाचस्पतिप्रभृतयोऽपि जडीभवन्ति।
तस्मान्निसर्गजडिमा कतमोऽहमत्र
स्तोत्रं तव त्रिपुरतापनपत्नि! कर्तुम् ॥२॥

मातस्तथापि भवतीं भवतीव्रताप-
विच्छित्तये स्तवमहार्णवकर्णधारः ।
स्तोतुं भवानि ! स भवच्चरणारविन्द-
भक्तिग्रहः किमपि मां मुखरीकरोति ॥३॥
सूते जगन्ति भवती भवती विभर्ति
जागर्ति तत्क्षयकृते भवती भवानि ! ।
मोहं भिनत्ति भवती भवती रुणद्धि
लीलायितं जयति चित्रमिदं भवत्याः ॥४॥
यस्मिन्मनागपि नवाम्बुजगौरीं
गौरीं प्रसादमधुरां दृशमादधासि ।
तस्मिन्निरन्तरमनङ्गशरावकीर्ण-
सीमन्तिनीनयनसन्ततयः पतन्ति ॥५॥
पृथ्वीभुजोऽप्युदयनप्रभवस्य तस्य
विद्याधरप्रणतिचुम्बितपादपीठः ।
तच्चक्रवर्तिपदवीप्रणयस्स एषः
त्वत्पादपङ्कजरजः कणजः प्रसादः ॥६॥
त्वत्पादपङ्कजरज ≍ प्रणिपातपूर्वैः
पुण्यैरनल्पमतिभिः कृतिभिः कवीन्द्रैः ।
क्षीरक्षपाकरदुकूलहिमावदाता
कैरप्यवापि भुवनत्रितयेऽपि कीर्तिः ॥७॥
कल्पद्रुमप्रसवकल्पितचित्रपूजां
उद्दीपितप्रियतमामदरक्तगीतिम् ।
नित्यं भवानि ! भवतीमुपवीणयन्ति
विद्याधराः कनकशैलगुहागृहेषु ॥८॥
लक्ष्मीवशीकरणकर्मणि कामिनीनां
आकर्षणव्यतिकरेषु च सिद्धमन्त्रः ।
नीरन्ध्रमोहतिमिरच्छिदुरप्रदीपो,
देवि ! त्वदङ्घ्रि जनितो जयतिः प्रसाद ॥९॥
देवि ! त्वदङ्घ्रिनखरत्न भवो [मयूखाः
प्रत्यग्रमौक्तिकरुचो मुदमुद्वहन्ति ।
सेवानतिव्यतिकरे सुरसुन्दरीणां
सीमन्तसीम्निकुसुमस्तब कायितं यैः ॥१०॥

मूर्ध्नि स्फुरत्तुहिनदीधितिदीप्तिदीप्तं
मध्ये ललाटममरायुधरश्मिचित्रम् ।
हृच्चक्रचुम्बि हुतभुक्कणिकानुकारि
ज्योतिर्यदेतदिदमम्ब ! तव स्वरूपम् ॥११॥
रूपं तव स्फुरितचन्द्रमरीचिगौरं
आलोकते शिरसि वागधिदैवतं यः ।
निस्सीमसूक्तिरचनामृतनिर्झरस्य
तस्य प्रसाद मधुराः प्रसरन्ति वाचः ॥१२॥
सिन्दूरपांसुपटलच्छुरितामिव द्यां
त्वत्तेजसा जतुरसस्नपितामिवोर्वीम ।
यः पश्यति क्षणमपि त्रिपुरे विहाय
व्रीडां मृडानि ! सुहृशस्तमनुद्रवन्ति ॥१३॥
मातर्मुहूर्तमपि यः स्मरति स्वरूपं
लाक्षारसप्रसरतन्तुनिभं भवत्याः ।
ध्यायन्त्यनन्यमनसस्तमनङ्गतप्ताः
प्रद्युम्नसीम्नि सुभगत्वगुणं तरुण्यः ॥१४॥
योऽयं चकास्ति गगनार्णवरत्नमिन्दुः
योऽयं सुरासुरगुरुः पुरुषः पुराणः ।
यद्भागमर्घमिदमन्धकसूदनस्य
देवि ! त्वमेव तदिति प्रतिपादयन्ति ॥१५॥
इच्छानुरूपमनुरूपगुणप्रकर्ष-
सङ्कर्षिणि ! त्वमभिमृश्य यदा बिभर्षि ।
जायेत स त्रिभवनैकगुरुस्तदानी
देवश्शिवोऽपि भुवनत्रयसूत्रधारः ॥१६॥
ध्यातासि हेमवति ! येन हिमांशुरश्मि-
मालामलद्युतिरकल्मषमानसेन ।
तस्याविलम्बमनवद्यमनन्तकल्पं
अल्पैर्दिनैस्सृजसि सुन्दरि ! वाग्विलासम् ॥१७॥
आधारमारुतनिरोधवशेन येषां
सिन्दूररञ्जितसरोजगुणानुकारि ।
दीप्तं हृदि स्फुरति देवि वपुस्त्वदीयं
ध्यायन्ति तानिह समीहितसिद्धिसार्थाः ॥१८॥

ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति
रूपं तावाम्ब ! नवयावकपङ्कपिङ्गम् ।
तेषां सदैव कुसुमायुधबाणभिन्न-
वक्षः स्थला मृगदृशो वशगा भवन्ति ॥१९॥

त्वामैन्दवीमिव कलामनुकालदेशं
उद्भासिताम्बरतलामवलोकयन्तः ।
सद्यो भवानि ! सुधियः कवयो भवन्ति
त्वं भावनाहितधियां कुलकामधेनुः ॥२०॥

शर्वाणि ! सर्व जनवन्दितपादपद्मे !
पद्मच्छदद्युतिविडम्बितनेत्रलक्ष्मि !
निष्पापमूर्तिजनमानसराजहंसि !
हंसि त्वमापदमनेकविधां जनस्य ॥२१॥

उत्तप्तहेमरुचिरे ! त्रिपुरे ! पुनीहि
चेतश्चिरन्तनमघौघवनं लुनीहि ।
कारागृहे निगलबन्धनयन्त्रितस्य
त्वत्संस्मृतौ झडिति मे निगलास्त्रुटन्ति ॥२२॥

त्वां व्यापिनीति सुमना इति कुण्डलीति
त्वां कामिनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति
देवि ! स्तुवन्ति विजयेति जयेत्युमेति ॥२३॥

उद्दामकामपरमार्थसरोजखण्ड-
चण्डद्युतिद्युतिमपासितषड्विकाराम् ।
मोहद्विपेन्द्रकदनोद्यतबोधसिंह-
लीलागुहां भगवतीं त्रिपुरां नमामि ॥२४॥

गणेशवटुकस्तुता रतिसहायकामान्विता
स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता ।
अनङ्गकुसुमादिभिः परिवृता च सिद्धैस्त्रिभिः
कदम्बवनमध्यगा त्रिपुरसुन्दरी पातु नः ॥२५॥

रुद्राणि ! विद्रुममयीं प्रतिमामिव त्वां
ये चिन्तयन्त्यरुणकान्तिमनन्यरूपाम् ।
तानेत्य पक्ष्मलदृशः प्रसंभ भजन्ते
कण्ठावसक्तमृदुबाहुलतांस्तरुण्यः ॥२६॥

त्वद्रूपैकनिरूपणप्रणयिताबन्धो दृशोस्त्वद्गुण-
ग्रामाकर्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि ।
त्वत्पादार्चनचातुरी कर युगे त्वत्कीर्तितं वाचि मे
कुत्रा त्वदुपासनव्यसनिता मे देवि मा शाम्यतु ॥२७॥
त्वद्रूपमुल्लसितदाडिमपुष्परक्तं
उद्भावयेन्मदनदैवतमक्षरं य: ।
तं रूपहीनमपि मन्मथनिर्विशेषं
आलोकयन्त्युरुनितम्बतटास्तरुण्य: ॥२८॥
ब्रह्मेन्द्ररुद्रहरिचन्द्रसहस्ररश्मि-
स्कन्दद्विपाननहुताशनवन्दितायै ।
वागीश्वरि ! त्रिभुवनेश्वरि ! विश्वमात:
अन्तर्बहिश्च कृतसंस्थितये नमस्ते ॥२९॥
य: स्तोत्रमेतदनुवासरमीश्वराया:
श्रेयस्करं पठति वा यदिवा श्रृणोति ।
तस्येप्सितं फलति राजभिरीड्यतेऽसौ
जायेत स प्रियतमो मदिरेक्षणानाम् ॥३०॥

॥ इति चर्चास्तव: द्वितीय: ॥

(३) घटस्तव:

आनन्दमन्थरपुरन्दरमुक्तमाल्य
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु मे विजयाय मञ्जु
मञ्जीरशिञ्जितमनोहरमम्बिकाया: ॥१॥
देवि ! त्र्यम्बकपत्नि ! पार्वति ! सति ! त्रैलोक्यमातश्शिवे !
शर्वाणि ! त्रिपुरे ! मृडानि ! वरदे ! रुद्राणि ! कात्यायनि !
भीमे ! भैरवि ! चण्डि ! शर्वरिकले ! कालक्षये ! शूलिनि !
त्वत्पादप्रणयानन्यासमनस: पर्याकुलान्पाहि न: ॥२॥
देवि ! त्वां सकृदेव य: प्रणमति क्षोणीभृतस्तं नम-
न्त्याजन्मस्फुरदङ्घ्रिपीठविलुठत्कोटीरकोटिच्छटा: ।
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यस्स्तौति स स्तूयते
यस्त्वां ध्यायाति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुव ॥३॥
उन्मत्ता इव सग्रहा इव विषव्यासक्तमूर्छा इव
प्राप्तप्रौढमदा इवार्तिविरहग्रस्ता इवार्ता इव ।

ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एवाग्रतः
त्यक्तोपाधिविवृद्धरागमभसो ध्यायन्ति तान् सुभ्रुवः ॥४॥
ध्यायन्ति ये क्षणमपि त्रिपुरे ! हृदि त्वां
लावण्ययौवनधनैरपि विप्रयुक्ताः ।
ते विस्फुरन्ति ललितायतलोचनानां
चित्तैकभित्तिलिखितप्रतिमाः पुमांसः ॥५॥

एतं किं नु दृशा पिवाम्युत विशाभ्यस्याङ्गमङ्गैर्निजैः
किं वाऽमुं निगराभ्यनेन सहसा किं वैकतामाश्रये ।
यस्येत्थं विवशो विकल्पललिताकूतेन योषिज्जनः
किं तद्यन्न करोति देवि ! हृदये यस्य त्वमावर्तसे ॥६॥
विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः
शब्दशक्तिरिति त्रिलोकजननि ! त्वय्येव तथ्यस्थितिः ।
इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं
त्वद्भक्तानपि न क्षिणोषि च रुषा तद्देवि ! चित्रं महत् ॥७॥

इन्दोर्मध्यगतां भृगाङ्कसदृशच्छायां मनोहारिणीं
पाण्डूत्फुल्लसरोरुहासनगतां स्निग्धप्रदीच्छविम् ।
वर्षन्तीममृतं भवानि ! भवतीं ध्यायन्ति ये देहिनः
ते निर्मुक्तरुजो भवन्ति रिपवः प्रोज्झन्ति तान् दूरतः ॥८॥
पूर्णेन्दोश्शकलैरिवातिबहलैः पीयूष पूरैरिव
क्षीराब्धेर्लहरीभरैरिव सुधापङ्कस्य पिण्डैरिव ।
प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया
चित्तान्तर्निहितार्तितापविपदस्ते सम्पदं बिभ्रति ॥९॥

ये संस्मरन्ति तरलां सहसोल्लसन्तीं
त्वां ग्रन्थिपञ्चकभिदं तरुणार्कशोणाम् ।
रागार्णवे बहलरागिणि मज्जयन्तीं
कृत्स्नं जगद्दधति चेतांसि तान् मृगाक्ष्यः ॥१०॥

लाक्षारसस्नपितपङ्कजतन्तुतन्वीं
अन्तः स्मरत्यनुदिनं भवतीं भवानि ।
यस्तं स्मरप्रतिममप्रतिमस्वरूपाः
नेत्रोत्पलैर्मृगदृशो भृशमर्चयन्ति ॥११॥
स्तुभस्त्वां वाचमव्यक्तां हिमकुन्देन्दुरोचिषम् ।
कदम्बमालां बिभ्राणामापादतललम्बिनीम् ॥१२॥

मूर्ध्नीन्दोस्सितपङ्कजासनगतां प्रालेय पाण्डुत्विषं
वर्षन्तीममृतं सरोरुहभुवो वक्त्रेऽपि रन्ध्रेऽपि च ।
अच्छिन्ना च मनोहरा च ललिता चातिप्रसन्नापि च
त्वामेवं स्मरतस्स्मरारिदयिते वाक्सर्वतो वल्गति ॥१३॥
ददातीष्टान् भोगान् क्षपयति रिपून् हन्ति विपदो
दहत्याधीन् व्याधीन् शमयति सुखानि प्रतनुते ।
हठादन्तर्दुःखं दलयति पिनष्टीष्टविरहं
सकृद्ध्याता देवी किमिव निरवद्य न कुरुते ॥१४॥
यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय
त्यन्वेति प्रतिपद्यते कलयति स्तौत्याश्रयत्यर्चति ।
यश्च त्र्यम्बकवल्लभे ! तव गुणानाकर्णयत्यादरात्
तस्य श्रीर्न गृहादपैति विजयस्तस्याग्रतो धावति ॥१५॥
किं किं दुःखं दनुजदलिनि ! क्षीयते न स्मृतायां
का का कीर्तिः कुलकमलिनि ! ख्याप्यते न स्तुतायाम् ।
का का सिद्धिस्सुखरनुते । प्राप्यते नार्चितायां
कं कं योगं त्वयि न चिनुते चित्तमालाम्बितायाम ॥१६॥
ये देवि ! दुर्धरकृतान्तमुखान्तरस्थाः
ये कालि ! कालघनपाशनितान्तबद्धाः ।
ये चण्डि ! चण्डगुरुकल्मषसिन्धुमग्नाः
तान् पासि मोचयसि तारयसि स्मृतैव ॥१७॥
लक्ष्मी वशीकरण चूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि चिरं जयन्ति ।
यानि प्रणाममिलितानि नृणां ललाटे
लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥१८॥
रे मूढाः ! किमयं वृथैव तपसा कायः परिक्लिश्यते
यज्ञैर्वा बहुदक्षिणैः किमितरे रिक्तीक्रियन्ते गृहाः ।
भक्तिश्चेदविनाशिनी भगवतीपादद्वयी सेव्यतां
उन्निद्राम्बुरुहातपत्रसुभगा लक्ष्मीः पुरो धावति ॥१९॥
याचे न कञ्चन न कञ्चन वञ्चयामि
सेवे न कञ्चन निरस्तसमस्तदैन्यः ।
श्लक्ष्णं वसे मधुरमद्मि भजे वरस्त्रीः
देवी हृदि स्फुरति मे कुलकामधेनुः ॥२०॥

नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥२१॥

॥ इति घटस्तवः तृतीयः ॥

(४) अम्बास्तवः

यामामनन्ति मनुयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यविदो वदन्ति ।
तामर्धपल्लवितशङ्कररूपमुद्रां
देवीमनन्यशरणश्शरणं प्रपद्ये ॥१॥

अम्ब स्तवेषु तव तावदकर्तृकाणि
कुण्ठीभवन्ति वचसामपि गुम्भनानि ।
डिम्भस्य मे स्तुतिरसावसमञ्जसापि
वात्सल्यनिघ्नहृदयां भवतीं धिनोतु ॥२॥

व्योमेति बिन्दुरिति नाद इतीन्दुलेखा-
रूपेति वाग्भवतनूरिति मातृकेति ।
निस्स्यन्दमानसुखबोध सुधास्वरूपा
विद्योतसे मनसि भाग्यवतां जनानाम् ॥३॥

आविर्भवत्पुलकसन्ततिभिश्शरीरैः
निस्स्यन्दमान सलिलैर्नयनैश्च नित्यम् ।
वाग्भिश्च गन्ददपदाभिरुपासते ये
पादौ तवाम्ब ! भुवनेषु त एव धन्याः ॥४॥

वक्त्रं यदुद्यतमभिष्टुतये भवत्याः
तुभ्यं नमो यदपि देवि ! शिरः करोति ।
चेतश्च यत्त्वयि परायणमम्ब ! तानि
कस्यापि कैरपि भवन्ति तपोविशेषैः ॥५॥

मूलालवालकुहरादुदिता भवानि !
निर्भिद्य षट्सरसिजानि तटिल्लतेव ।
भूयोऽपि तत्र विशसि ध्रुवमण्डलेन्दु-
निस्स्यन्दमानपरमामृततोयरूपा ॥६॥

दग्धं यदा मदनमेकमनेकधा ते
मुग्धः कटाक्षविधिरङ्कुरयाञ्चकार ।
धत्ते तदाप्रभृति देवि ललाटनेत्रं
सत्यं ह्रियैव मुकुलीकृतमिन्दुमौलेः ॥७॥

अज्ञातसम्भवमनाकलितान्ववार्थं
भिक्षुं कपालिनमवाससमद्वितीयम् ।
पूर्वं करग्रहणमङ्गलतो भवत्याः
शम्भुं क एव बुबुधे गिरिराजकन्ये ॥८॥
चर्माम्बरं च शवभस्मविलेपनं च
भिक्षाटनं च नटनं च परेतभूमौ ।
वेतालसंहृतिपरिग्रहता च शम्भोः
शोभां बिभर्ति गिरिजे ! तव साहचर्यात् ॥९॥
कल्पोपसंहरणकेलिपु पण्डितानि
चण्डानि खण्डपरशोरपि ताण्डवानि ।
आलोकनेन तव कोमलितानि मातः !
लास्यात्मना परिणमन्ति जगद्विभूत्यै ॥१०॥
जन्तोरपश्चिमतनोस्सति कर्मसाम्ये
निश्शेषपाशपटलच्छिदुरा निमेषात् ।
कल्याणि ! देशिककटाक्षसमाश्रयेण
कारुण्यतो भवति शम्भववेधदीक्षा ॥११॥
मुक्ताविभूषणवती नवविद्रुमाभा
यच्चेतसि स्फुरसि तारकितेव सन्ध्या ।
एकस्स एव भुवनत्रयसुन्दरीणां
कन्दर्पतां व्रजति पञ्चशरीं विनापि ॥१२॥
ये भावयन्त्यमृतवाहिभिरंशुजालै
आप्यायमानभुवनाममृतेश्वरीं त्वाम् ।
ते लङ्घयन्ति ननु मातरलङ्घनीयां
ब्रह्मादिभिस्सुरवरैरपि कालकक्षाम् ॥१३॥
यस्स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां
व्याख्यासमुद्यतकरां शरदिन्दुशुभ्राम् ।
पद्मासनां च हृदये भवतीमुपास्ते
मातः ! स विश्वकवितार्किकचक्रवर्ती ॥१४॥
बर्हावतंसयुतबर्बरकेशपाशां
गुञ्जावलीकृतघनस्तनहारशोभाम् ।
श्यामां प्रवालवदनां सुकुमारहस्तां
त्वामेव नौमि शबरीं शबरस्य जायाम् ॥१५॥

अर्धेन किं नवलताललितेन मुग्धे
क्रीतं विभोः परुषमर्धमिदं त्वयेति ।
आलीजनमस्य परिहासवचांसि मन्ये
मन्दस्मितेन तव देवि ! जडीभवन्ति ॥१६॥

ब्रह्माण्डबुद्बुदकदम्बक सङ्कुलोऽयं
मायोदधिर्वि विधतत्त्वतरङ्गमालाः ।
आश्चर्यमम्ब ! झडिति प्रलयं प्रयाति
त्वध्द्यानसन्ततिमहावडबामुखाग्नौ ॥१७॥

दाक्षायणीति कुटिलेति कुहारिणीति
कात्यायनीति कमलेति कलावतीति ।
एका सती भगवती परमार्थतोऽपि
संदृश्यसे बहुविधा ननु नर्तकीव ॥१८॥

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥१९॥

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनासि पुरुषे पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले शिखिनि त्वमूष्मा
निस्सारमेव निखिलं त्वदृते यदि स्यात् ॥२०॥

ज्योतींषि यद्दिव चरन्ति यदन्तरिक्षं
सूते पयांसि यदहिर्धरणीं च धत्ते ।
यद्वाति वायुरनलो यदुदर्चिरास्ते
तत्सर्वमम्ब ! तव केवलमाज्ञयैव ॥२१॥

सङ्कोचमिच्छसि यदा गिरिजे ! तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपासि यदा तदानीं
त्वन्नामरूपगणनास्सुकरा भवन्ति ॥२२॥

भोगाय देवि ! भवतीं कृतिनः प्रणम्य
भ्रूकिङ्करीकृतसरोजगृहास्सहस्रम् ।
चिन्तामणिप्रचयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं रमन्ते ॥२३॥

हर्तुं त्वमेव भवसि त्वदधीनमीशे
संसारतापमखिलं दयया पशूनाम् ।
वैकर्तनी किरणसंहतिरेव शक्ता
धर्मं निजं शमयितुं निजयैव वृष्ट्या ॥२४॥
शक्तिश्शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमानसजालमिच्छा ।
ऐश्वर्यमायतनमावरणानि च त्वं
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥२५॥
भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्याऽनले मरुति शान्तिरतीव कान्तिः ।
व्योम्नीतिः याः किल कलाः कलयन्ति विश्वं
तासां हि दूरतरमम्ब ! पदं त्वदीयम् ॥२६॥
यावत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये !
तावद्विकल्पजटिलाः कुटिलप्रकाराः
तर्कग्रहास्समयिनां प्रलयं न यान्ति ॥२७॥
निर्देवयानपितृयानविहारमेके
कृत्वा मनः करणमण्डलसार्वभौमम् ।
ध्याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति ! नयन्ति निजासनत्वम् ॥२८॥
स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः
कस्याश्चनापि तव वैभवमम्ब ! यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सापि स्तुता किल भयेति तितिक्षितव्यम् ॥२९॥
कालाग्निकोटिरुचिमम्ब षडध्वशुद्धौ
आप्लावनेषु भवतीममृतौघवृष्टिम् ।
श्यामां घनस्तनतटां शकलीकृताघां
ध्यायन्त एव जगतां गुरवो भवन्ति ॥३०॥
विद्यां परां कतिचिदम्बरमम्ब ! केचित्
आनन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनामः
साक्षादपारकरुणां गुरुमूर्तिमेव ॥३१॥

कुवलयदलनीलं बर्बरस्निग्धकेशं
पृथुतरकुचभाराक्रान्तकान्तावलग्नम् ।
किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः
सकलजननि ! मातः ! सन्ततं सन्निधत्ताम् ॥३२॥

॥ इत्यम्बास्तवः चतुर्थः ॥

(५) सकलजननी स्तोत्रम्

अजानन्तो यान्ति क्षयमवशमन्योन्यकलहैः
अमी मायाग्रन्थौ तव परिलुठन्तस्समथिनः ।
जगन्मातः ! जन्मज्वरभयतमः कौमुदि ! वयं
नमस्ते कुर्वाणाश्शरणमुपयामो भगवतीम् ॥१॥

वचस्तर्कागम्यस्वरसपरमानन्दविभव-
प्रबोधाकाराय द्युतितुलितनीलोत्पलरुचे ।
शिवाद्याराध्याय स्तनभरविनम्राय सततं
नमस्तस्मै कस्मैचन भवतु मुग्धाय महसे ॥२॥

अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी
शिवस्यासीर्यत्त्वं परिणयविधौ देवि ! गृहिणी ।
सवित्री भूतानामपि यदुदभूश्शैलतनया
तदेतत्संसारप्रणयनमहानाटकमुखम् ॥३॥

ब्रुवन्त्येके तत्त्वं भगवति सदन्ये विदुरसत्
परे मातः ! प्राहुस्तव सदसदन्ये सुकवयः ।
परे नैतत्सर्वं समभिदंधते देवि ! सुधियः
तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ॥४॥

लुठद्गुञ्जाहारस्तनभरनमन्मध्यलतिकां
उदञ्चद्धर्माम्भः कणगुणित वक्राम्बुजरुचम् ।
शिवं पार्थत्राण प्रवणमृगयाकारगुणितं
शिवामन्वग्यान्तीं शरणमहमन्वेमि शबरीम् ॥५॥

मिथः केशाकेशिप्रथननिधनास्तर्कघनाः
बहुश्रद्धाभक्ति प्रणतिविषयाश्शास्त्रविधयः ।
प्रसीद प्रत्यक्षीभव गिरिसुते ! देहि शरणं
निरालम्बं चेतः परिलुठति पारिप्लवमिदम् ॥६॥

शुनां वा वह्नेर्वा खगपरिषदो वा यदशनं
कदा केन क्वेति क्वचिदपि न कश्चित्कलयति ।

अमुष्मिन् विश्वासं विजहिहि ममह्लाय वपुषि
प्रपद्येथाश्चेतः ! सकलजननीमेव शरणम् ॥७॥
तटित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थिगहनं
प्रविष्टं स्वाधारं पुनरपि सुधावृष्टिवपुषा ।
किमप्यष्टाविंशत्किरणसकलीभूतमनिशं
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥८॥
चतुष्पत्रान्तष्षड्दलपुटभगान्तस्त्रिवलय-
स्फुरद्विद्युद्वह्निद्युमणिनियुताभद्युतिलते ।
षडश्रं भित्त्वाऽऽदौ दशदलमथ द्वादशदलं
कलाश्रं च द्व्यश्रं गतवति नमस्ते गिरिसुते ॥९॥
कुलं केचित्प्राहुर्वपुरकुलमन्ये तत्र बुधाः
परे तत्संभेदं समभिदधते कौलमपरे ।
चतुर्णामप्येषामुपरि किमपि प्राहुरपरे
महामाये ! तत्त्वं तवकथममी निश्चिनुमहे ॥१०॥
षडध्वारण्यानीं प्रलयरविकोटिप्रतिरुचा
रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसाम् ।
वितन्वानश्शैवं किमपि वपुरिन्दीवररुचिः
कुचाध्मामानम्रस्तव पुरुषकारो विजयते ॥११॥
प्रकाशानन्दाभ्यामविदितचरीं मध्यपदवीं
प्रविश्यैतद्द्वन्द्वं रवि शशिसमाख्यं कबलयन् ।
प्रपद्योर्ध्वं नादं लयदहन भस्मीकृतकुलः
प्रसादात्ते जन्तुश्शिवम कुलमम्ब ! प्रविशति ॥१२॥
मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् ।
कटाक्षश्चेद्यत्र क्वचन तव मातः करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥१३॥
प्रियङ्गुश्यामाङ्गीमरुणतरवास ≍ किसलयाँ
समुन्मीलन्मुक्ताफल वहलनेपथ्यसुभगाम् ।
स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां
सकृद्ध्यायन्तस्त्वां दधति शिवचिन्तामणिपदम् ॥१४॥
षडाधारावर्तैरपरिमितमन्त्रोर्मि पटलैः
लसन्मुद्राफेनैर्बहुविधचलद्दैवतझसैः ।

क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदी
भवानि ! प्रत्यग्रा शिवचिदमृताब्धिप्रणयिनी ॥१५॥
महीपाथोवह्निश्वसनवियदात्मेन्दुरविभिः
वपुर्भिर्ग्रस्ताशैरपि तव कियानम्ब ! महिमा ।
अमून्यालोल्यन्ते भगवति ! न कुत्राप्यणुतमां
अवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥१६॥
कलामाज्ञां प्रज्ञां समयमनुभूतिं समरसं
गुरुं पारम्पर्यं विनयमुपदेशं शिवपदम् ।
प्रमाणं निर्वाणं प्रकृतिमिभिभूतिं परगुहां
विधिं विद्यामाहुस्सकलजननीमेव मुनयः ॥१७॥
प्रलीने शब्दौघे तदनु विरते बिन्दुविभवे
ततस्तत्त्वे चाष्टध्वनिभिरनपायिन्यधिगते ।
श्रिते शाक्ते पर्वण्यनुकलितचिन्मात्रगहनां
स्वसंवित्तिं योगी रसयति शिवाख्यां भगवतीम् ॥१८॥
परानन्दाकारां निरवधिशिवैश्वर्यवपुषं
निराकारां ज्ञानप्रकृतिमपरिच्छिन्नकरुणाम् ।
सवित्रीं लोकानां निरतिशयधामास्पदपदां
भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ॥१९॥
जगत्काये कृत्वा तदपि हृदये तच्च पुरुषे
पुमांसं बिन्दुस्थं तदपि वियदाख्ये च गहने ।
तदेतद्ज्ञानाख्ये तदपि परमानन्दगहने
महाव्योमाकारे त्वदनुभवशीलो विजयते ॥२०॥
विधे ! विद्ये ! विद्ये ! विवधसमये ! वेदगुलिके !
विचित्रे ! विश्वाद्ये ! विनयसुलभे ! वेदजननि !
शिवज्ञे ! शूलस्थे ! शिवपदवदान्ये ! शिवनिधे !
शिवे ! मातः ! मह्यं त्वयि वितर भक्तिं निरुपमाम् ॥२१॥
विधेर्मुण्डं हृत्वा यदकुरुत पात्रं करतले
हरिं शूलप्रोतं यदगमयदंसाभरणताम् ।
अलंचक्रे कण्ठं यदपि गरलेनाम्ब ! गिरिशः
शिवस्थायाश्शक्तेस्तदिदमखिलं ते विलसितम् ॥२२॥
विरिञ्च्याख्या मातः ! स्सृजसि हरिसंज्ञा त्वमसि
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम् ।

भवन्ती नादाख्या विहरसि च पाशौघदलनी
त्वमेवैकाऽनेका भवसि कृतिभेदैर्गिरिसुते ॥२३॥
मुनीनां चेतोभिः प्रमुदितकषायैरपि मनाक्
अशक्यं संस्प्रष्टुं चकितचकितैरम्ब ! सततम् ।
श्रुतीनां मूर्धानं प्रकृतिकठिनाः कोमलतरे
कथं ते विन्दन्ते पदकिसलये पार्वतिपदम् ॥२४॥
तटिद्वल्लीं नित्याममृतसरितं पाररहितां
मलोत्तीर्णां ज्योत्स्नां प्रकृतिमगुणग्रन्थिगहनाम् ।
गिरां दूरां विद्यामविनतकुचां विश्वजननीं
अपर्यन्तां लक्ष्मीमभिदधति सन्तो भगवतीम् ॥२५॥
शरीरं क्षित्यम्भः प्रभृतिरचितं केवलमचित्
सुखं दुःखं चायं कलयति पुमांश्चेतन इति ।
स्फुटं जानानोऽपि प्रभवति न देही रहयितुं
शरीराहङ्कारं तव समयबाह्यो गिरिसुते ॥२६॥
पिता माता भ्राता सुहृदनुचरस्सद्म गृहिणी
वपुः क्षेत्रं मित्रं धनमपि यदा मां विजहति ।
तदा मे भिन्दाना सपदि भयमोहान्धतमसं
महाज्योत्स्ने ! मातः ! भव करुणया सन्निधिकरी ॥२७॥
सुता दक्षस्यादौ किल सकलमातः ! त्वमुदभूः
सदोषं तं हित्वा तदनु गिरिराजस्य दुहिता ।
अनाद्यन्ता शम्भोरपृथगपि शक्तिर्भगवती
विवाहाज्जायाऽसीत्यहह चरितं वेत्ति तव कः ॥२८॥
कणास्त्वद्दीप्तीनां रवि शशिकृशानु प्रभृतयः
परं ब्रह्म क्षुद्रं तव नियतमानन्दकणिका ।
शिवादि क्षित्यन्तं त्रिवलयतनोस्सर्वमुदरे
तवास्ते भक्तस्य स्फुरसि हृदि चित्रं भगवति ॥२९॥
पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं
परं स्थूलं सूक्ष्मं सकलमकलं गुह्यमगुह्यम् ।
दवीयो नेदीयस्सदसदिति विश्वं भगवती
सदा पश्यन्त्याख्यां वहसि भुवनक्षोभजननीम् ॥३०॥
प्रविश्य त्वन्मार्गं सहजदयया देशिकदृशा
षडध्वध्वान्तौघच्छिदुरगणनातीतकरुणाम् ।
परामाज्ञाकरां सपदि शिवयन्तीं शिवतनुं
स्वमात्मानं धन्याश्चिरमुपलभन्ते भगवतीम् ॥३१॥

मयूखाः पुष्णीव ज्वलन इव तद्दीप्तिकणिकाः
पयोधौ कल्लोलाः प्रतिहतमहिम्नीव पृषतः ।
उदेत्योदेत्याम्ब ! त्वयि स निजैस्सात्त्विकगुणैः
भजन्ते तत्त्वौघाः प्रशममनुकल्पं परवशाः ॥३२॥
विधुर्विष्णुर्ब्रह्मा प्रकृतिरणुरात्मा दिनकरः
स्वभावो जैनेन्द्रस्सुगतमुनिराकाशमलिनः ।
शिवश्शक्तिश्चेति श्रुतिविषयतां तामुपगता
विकल्पैरेभिस्त्वामभिदधति सन्तो भगवतीम् ॥३३॥
शिवस्त्वं शक्तिस्त्वं त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ।
अविद्या त्वं विद्या त्वमसि निखिलं त्वं किमपरं
पृथक्तत्वं त्वत्तो भगवति न वीक्षामह इमे ॥३४॥
त्वयासौ जानीते रचयति भवत्यैव सततं
त्वयैवेच्छत्यम्ब ! त्वमसि निखिला यस्यतनवः ।
